CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीसुप्रभातस्तोत्र मणिमंजरी

7-9-1943 दिने स्वप्ने
संदर्शित श्रीवेङ्कटेश्वरमूर्तिः

मुलुण्ड्
ब्रह्मश्री. वे- रामनाथघनपाठी

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीसुप्रभातस्तोत्र मणिमंजरी

रचयिता

सलक्षण कृष्णयजुर्वेदभाष्याभिज्ञ,

ज्योतिषाभिज्ञ, वेदभास्कर,

वेदवेणु विशारद, अन्ध्रप्रदेश-

प्रभुत्वगौरवसंमानितः

वेङ्कटेश्वरप्रसाद कविः

मुल्लण्डूं वे. रामनाथ घनपाठी

वेदप्रधानाध्यापकः (Retd.)

श्रीवेङ्कटेश्वरप्राच्यकलाशाला, तिरुपति,

आन्ध्र प्रदेशः

1983

Bhavan's Sri Sankaracharya Sanskrit Mahavidyalaya Bharatiya Vidya
520
विद्या भवन, नई दिल्ली
981-98

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

© M. V. Ramanatha Ghanapati.

6–2–86 A. Balamandir Road,
TIRUPATI–517501, (Andhra Pradesh).

This book is Published
With the Financial Assistance
of
Tirumala-Tirupati Devasthanam
under their scheme
Aid to Publish religious books.

First Edition, November, 1983, (1000 Copies)

Price Rs. 12.00

Bhawan's Sri Sankaracharya Sanskrit Mahavidyalaya Bharatiya Vidya
520

Printed by

Ramani Brothers, (Printers)
No. 4, C. P. Ramaswamy Iyer Street,
Madras–600 018,

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विषयसूचिका

श्रीमुखम्— श्रीशारदापीठम्, शृंङ्गेरी
श्रीमुखम्—श्रीकामकोटीपीठम्, काञ्ची
आमुखम्—डाक्टर्, मह्लादि
द. बालासुब्रह्मण्यम्,
अध्यक्षः, केन्द्रीयसंस्कृत विद्यापीठः,
ब्रह्मश्री बालकृष्ण शास्त्रीणः
अध्यक्षः, मैलप्पूर् संस्कृत कलाशाला मद्रास्
Foreword— A. Natarajan Secretary, 8
The Tirupati Cultural Association, Tirupati.
विज्ञप्तिः— 4
1 श्रीमद् पञ्चमूर्तिविनायक पञ्चचामरस्तुति पञ्चकम् 1
2 श्रीतिरुत्तणि सुब्रह्मण्य सुप्रभातस्तोत्रम् 3
3 श्रीवेङ्कटेश्वरविशेषवैभवस्तोत्रम् 17
4 श्रीकार्तिकेय स्वरूप श्रीवेङ्कटेश्वर नवरत्न मालिका 22
5 श्रीमङ्गापुरप्रसन्न कल्याण वेङ्कटेश्वर सुप्रभात स्तोत्रम् 25
6 श्रीकाञ्चीहस्तीश्वरसुप्रभातस्तोत्रम् 33

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

7 श्रीकपिलेश्वरसुप्रभातस्तोत्रम् 50
8 श्रीकाञ्ची श्रीचन्द्रशेखरेन्द्र
सरस्वतीनां आचार्य प्रपत्ति नवरत्नमालिका 58
9 श्रीकाञ्ची श्रीजयेन्द्रसरस्वतीनां
आचार्य प्रपत्ति पञ्चरत्नम् 61
10 श्रीवल्लीगिरीश सुब्रह्मण्य सुप्रभात स्तोत्रं, गद्यम् च 63
11 श्रीश्रृंगगिरि श्री अभिनवविद्यातीर्थमहास्वामिनां
आचार्य प्रपत्तिनवरत्नमालिका 72
12 श्रीश्रृंगगिरि श्रीभारतीतीर्थस्वामिनां
आचार्य प्रपत्तिनवरत्नमालिका 75
13 श्रीमहालक्ष्मीदण्डकम् 78
14 श्रीसरस्वती दण्डकम् 80
15 श्रीसद्गुरु त्यागराजसुप्रभातस्तोत्रम् 82

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.



काञ्चीकामकोठिपीठाधिपति श्रीचन्द्रशेखरेन्द्रसरस्वतीस्वामिपादाः

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ॐ

॥ श्रीकाञ्चीकामकोटि पीठाधिपति जगद्गुरु ॥
श्री शङ्कराचार्यकामकोटिपीठम् श्रीकाञ्चीपुरम्

श्रीमत्परमहंसपरिव्राजकाचार्यवर्य
श्रीमच्छङ्करभगवत्पादप्रतिष्ठित
श्रीकाञ्चीकामकोटिपीठाधिपजगद्गुरू
श्री श्री श्री चन्द्रशेखरेन्द्रसरस्वती श्रीपादादेशानुसारेण
श्री श्री श्रीमज्जयेन्द्रसरस्वती श्रीपादैः

ब्रह्मण्डम् श्रीरामनाथघनपाठिनां विषये क्रियते नारायणस्मृतिः—

प्राचीनकालादारभ्य स्वात्मनः परमात्मनश्च सुप्रभातस्तोत्राणां पठनं संप्रदायरूपेण प्रसिद्धम् । तदनुसारेण बहुभिः तत्तद्देवताविषये सुप्रभातस्तोत्राणि रचितानि । सर्वेषामेषां मध्ये श्रीवेङ्कटेश्वरसुप्रभातस्तोत्रं मुख्यं सर्वेषामिदानीं सुविदितं विराजते । तद्रीत्या श्रीरामनाथघनपाठिभिः स्वेनैव रचितानि सुप्रभातस्तोत्राणि अन्यानि च स्तोत्राणि श्रीमत्पञ्चमूर्तिविनायकपञ्चचामर स्तुतिपञ्चकम् । श्रीसुब्रह्मण्यसुप्रभातनक्षत्रकालिका, श्रीवेङ्कटेश्वरविशेषवैभवस्तोत्रम् इत्यादीनि तत्र तत्र पूर्वमेव

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मुद्रापितानि अन्यान्यपि संकलय्य 'श्रीसुप्रभातस्तोत्रमणिमञ्जरी' इति नाम्ना पुस्तकरूपेणप्रकाशयिष्यन्ते इति विदित्वा मोदामहे। सर्वेऽप्यास्तिकाः स्तोत्राणीमानि पठित्वा भगवदनुग्रहं प्राप्नुयुः, श्रीघनपाठिनोऽपि उपर्युपरि एतादृशानि स्तोत्राणि विरचय्य भगवत्कृपापात्रं भवेयुरित्याशास्महे

नारायणस्मृतिः

विजययात्रास्थानम्
सुधानगरम्
(Cementnagar
Kurnool Dt. (A.P)
रुधिरोद्गारिसंवत्सर-
कार्तिकशुक्लपञ्चमी

९-११-१९८३

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.



शृंगेरिः शारदापीठाधिपति अभिनवविद्यतीर्थ
महास्वामिपादाः

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मुद्रा

श्री श्री जगद्गुरु शङ्कराचार्य महासंस्थानम्, दक्षिणाम्नाय श्री शारदापीठम्, शृङ्गेरी

मुलुण्ड् श्री रामनाथ घनपाठिनः भक्तिशीलाः। स्वोपार्जितया कवितया बहून् देवान् स्वानुभव प्रकाशन पूर्वकं अस्तुवन्। एतेषु स्तोत्रेषु तत्र तत्र प्रचलिताः कथा अपि सन्निविष्टास्सन्ति। अस्य स्तुतिपुस्तकस्य प्रचारार्थमिमे प्रयतन्ते। ग्रन्थस्यास्यावलोकनेन क्षेत्रमाहात्म्यादिकं अवगन्तुं पार्यते। ग्रन्थोयं भक्तपाणिपल्लव भूषणं भूयादिति श्री जगद्गुरुचरणाः आशासते।

बेङ्गलूरु — इति निवेदयिता

३-११-१९८३ — सि. वि. गिरिधरशास्त्री

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आमुखम्

महदिदं प्रमोदस्थानं यत् मुलुण्डूं ग्रामाभिजनाः सत्कुलप्रसूताः कृष्णयजुर्वेदभाष्याभिज्ञाः ज्योतिश्शास्त्रविदः वेदभास्करबिरुदाङ्किताः आन्ध्रप्रदेश (Award) गौरवसम्मानिताः श्रीवेङ्कटेश्वर प्राच्य कलाशाला (Retired) वेदप्रधानाध्यापकाः श्रीवेङ्कटेशप्रसादासादित कविता शक्तिमन्तः सात्विकस्वभावाः ब्रह्मश्रीयुताः एम्. वी. रामनाथसलक्षण-घनपाठिमहोदयाः मञ्जुळवाग्विलासैः गुम्फितां पञ्चमूर्तिविनायकादि नानादेवतास्तुतिपरां स्तोत्रमञ्जरीं निर्माय प्रकाश्य च निबन्धात्मना सहृदयानां भगवद्भक्तानां आस्तिकवर्याणां पुरतः सप्रमोदभरं उपहारी कुर्वन्तीति ।

स्तोत्रमञ्जर्यामस्यां आदौ श्रीमत्पञ्चमूर्तिविनायकाः पञ्चचामर स्तुतिपञ्चकेन स्तूयंते । ततः श्रीसुब्रह्मण्यसुप्रभात नक्षत्रमालिका प्रभृतीनि श्रीसुब्रह्मण्य श्रीवेङ्कटेशादि स्तोत्राणि श्रीकल्याणवेङ्कटेश्वर, श्रीकालहस्तीश्वर, श्रीकपिलेश्वर, श्रीवल्लीगिरीशसुब्रह्मण्य सुप्रभातानि श्रीसुब्रह्मण्यगद्यं, श्रीमहालक्ष्मीदण्डकं, श्रीसरस्वतीदण्डकं, श्रीरामभक्ताग्रे-सराणां गायकश्रेष्ठानां श्रीत्यागराज स्वामिनां सुप्रभातस्तोत्र, प्रपत्ति, मङ्गलानि, श्रीकामकोटिपीठाधिपानां विषये "आचार्य प्रपत्ति नवरत्न-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मालिका, आचार्यप्रपत्ति पञ्चरत्नं, तथा श्रीशारदापीठाधिपानां विषये नवरत्नमालिकाद्वयञ्चेति पद्यगद्यदण्डकात्मिकया सहृदयाह्लादकारिण्या अतिकमनीयया सरण्या निर्मिता चकास्ति ।

एतत्स्तोत्रमञ्जरी प्रणेतॄन् तत्तत् स्तोत्राणि च अधिकृत्य विशिष्य सुविशदं आङ्गलभाषामय प्रस्तावनायां श्रीमद्भिः ए. नटराजन् महाशयैः विवृतमिति न तत्र मया पुनः व्याप्रियते । परन्तु एतत्स्तोत्रमञ्जरी मध्यस्थित "कार्तिकेयस्वरूप श्रीवेङ्कटेश्वर नवरत्न-मालिकां" पठतां सहृदयानां मनसि अपूर्वः कश्चित् औत्सुक्य विशेषः समुन्मिषेदेव । एवमेव च श्रीकामकोटिपीठाधिपानां तथा श्रीशारदा पीठाधिपानां च प्रपत्तिनवरत्नमालिका प्रणयनं पीठद्वयेऽपि एतेषां कविपुङ्गवानां अभिन्नां भक्तिं अभिव्यनक्ति । तदिदं ग्रन्थरत्नं द्राविड, आन्ध्रभाषामयार्थानुवादसहितं मुद्रितञ्चेत् तदा अशेषोपकारकं भवेदिति मन्ये । विश्वसिमि च सर्वेऽपि सहृदयाः आस्तिकवर्याः स्तोत्रमञ्जर्याः अस्याः ग्रहणेन पठनेन च मञ्जरीरसमास्वाद्य भगवदनुग्रहं च लब्ध्वा स्तोत्रमञ्जरीप्रणेतॄणां उद्यमं सफलीकुर्युरिति ।

इत्थं,

वि. बालकृष्णशास्त्री

SASTRA RATNAKARA
V. BALAKRISHNA SASTRY
Retd. Principal, Mylapore Sanskrit College
Phone : 412883 Madras

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ॐ

आमुखम्

विदितमेव सर्वेषां तिरुपतिक्षेत्र वासिनाम् आस्तिकानां वैदिकानां संस्कृतज्ञानां च यत् तत्रभवन्तः श्रीमन्तः मुल्लण्डं श्रीरामनाथघनपाठिनः वैदिकविदितवंशजाः वेदवेदाङ्ग विदः कृष्णयजुर्वेदभाष्यज्ञाः ज्योतिषाभिज्ञाः "वेदभास्कर" - बिरुदाङ्किताः आन्ध्रप्रदेश प्रभुत्वसंमानिताः श्री वेङ्कटेश्वरप्राच्यविद्या - कलाशालायां बहुकालं वेदाध्यापनम् अकुर्वन्निति। ततो निवृत्ताः प्राप्तशेषाचलनायकप्रसादाः लब्धश्रीकाञ्ची कामकोटिपीठ-जगद्गुरुश्रीशङ्कराचार्यकटाक्षाश्च श्रीरामनाथघनपाठिनः कविताप्रति-भान्विताः संप्रति सप्तदशप्रकरणेषु पञ्चचामरस्तुतिपञ्चकादारभ्य श्रीत्यागराज - सुप्रभात - प्रपत्ति - मङ्गलाशासनपर्यन्तं गणनायक - सुब्रह्मण्य - वेङ्कटेश्वर - कपिलेश्वर - कालहस्तीश्वर - वल्लीगिरीशादीनां देवानां स्तुतिरूपाणि रमणीयानि पद्यानि समालिखन्। अन्यच्च। श्रीकाञ्चीकामकोटिपीठाधीश्वरप्रवृत्तिरूपा नवरत्नमालिका, शृङ्गगिरि श्री महागणपति वाक्यार्थमहासभायां पठिता नवरत्नमालिका, श्रीमहालक्ष्मी-सरस्वतीदण्डकद्वयं च विदुषाम् आमोदाय भवन्ति। तत्त्वम्—एतैः श्रुत्यर्थपुष्टं ललितपदबद्धम् अनेकवृत्तसमन्वितं भक्तजनरञ्जकं च स्तोत्रपुस्तकमलेखि—एतमेवानुपश्यामि। मन्ये चेदं पुस्तकं भक्तानाम् आस्तिकानां च महते उपकाराय कल्पते। एतत्स्तोत्राणि पठितुः शृण्वतश्च चतुर्विधफलपुरुषार्थसिद्धिं ददातु भगवान् भक्तवत्सलः वेदाचलनायक इति शम्।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीरामनाथ - घनपाठि - कवि - प्रणीतं
स्तोत्रं समस्त - पुरुषार्थद - पारिजातम् ।
यः सन्ततं पठति भक्तिरसे निमग्नः
सन्मङ्गलं स लभते भगवत्प्रसादात् ॥

इत्थं

मल्लादि. द. बालसुब्रह्मण्यः

आचार्यरत्न - साहित्यरत्न - विद्याभूषण -
मल्लादि द. बालसुब्रह्मण्यः एम्. ए., पि. हेच्. डि.,
प्रधानाचार्यः,
केन्द्रीयसंस्कृतविद्यापीठम्
तिरुपति (आ. प्र.)

डाक्टर् मल्लादि. द. बालसुब्रह्मण्यम्,
एम्. ए. पि. हेच्. डि.,
अध्यक्षः, केन्द्रीयसंस्कृतविद्यापीठम्,
तिरुपति

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

FOREWORD

I deem it a great privilege and honour to write a few lines about the book *Sri Suprabhata Stotramanimanjari* and its author, Brahmasri Mullandram Venkataraya Ramanatha Ghanapathi.

The author hails from Mullandram, a village in North Arcot District of Tamil Nadu where the Dindima Kavi Sarvabhauma Arunagirinatha who won a contest over the famous Dindima poets lived during the thirteenth century. Matrilineally he is a descendant of Gururama Kavi who was the Guru of Sri Appayya Dikshita and who wrote *Subhadra-dhananjaya natakam, Harischandra champu* et cetera in Sanskrit.

He was born on April 6, 1914 at Mullandram as the son of Venkataraya Sastri and Meenakshi. He belongs to the Goutama gotram, Apasthamba sutram and Taittiriya sakha of Krishna Yajurvedam.

He studied Krishna Yajurvedam first under his own father and later under Lakshanakesari Brahmasri Vijayaraghava Ghanapathi in Sri Venkatesvara Vedapatasala in Sri Venkatesvara Sanskrit College, Tirumala-Tirupati. He became a fully qualified Salakshana Ghananta Krishna Yajurvedi, acquiring the appellation of Ghanapathi.

Even as a student he had the good fortune to attend a Yajna at Benares, thanks to his teacher Brahmasir Vijayaraghava Ghanapathi.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

He learnt Sanskrit also along with Yajurvedabhashya and acquired skill in composing Sanskrit verses too. Besides Sanskrit, he knows Tamil, Telugu, Kannada and Malayalam.

He is well-versed in Jyotisha sastra also. He was a paper-setter and examiner in Jyotisha, acted as Chairman, Jyotisha Board of Examiners and was also a one-man Commissioner of the Madras University for reorganising the Jyotisha course.

He entered service in Tirumala-Tirupati Devasthanams as Vedaparayanamdar in 1938. Later, he joined the teaching staff of Sri Venkatesvara Vedapathasala, Tirumala and retired as Lecturer in Salakshana Ghananta Krishna Yajurveda in Sri Venkatesvara Oriental College, Tirupati after a meritorious service of more than thirty-five years.

He has attended many a Vedic and Vidvat Sadas conducted by Kanchi and Sringeri Sankaracharyas, Udupi Madhwacharya and Maharishi Mahesha Yogi. He has also participated in the Vedic seminar conducted by Sri Venkatesvara University, Tirupati and also in the Summer School of Hindu Religion conducted by Tirumala-Tirupati Devasthanams. He has also participated in the All India Vedic Seminar at Delhi conducted by Sriman Narayana Jeer in 1973.

He started composing Sanskrit poems, especially Suprabhatams at the request of the authorities of many temples.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Swami Sivananda of Rishikesh conferred on him the titles *Salakshana Krishna Yajurveda-bhashyabijna* and *Jyotishabhijna* in 1956. He was the recipient of the Vedic Scholar award of the Government of Andhra Pradesh in 1969. Tirupati Sanskrit Parishad conferred on him the title of *Veda Bhaskara* in 1970. The title of *Veda Venu Visharada* was bestowed on him in recognition of his unique proficiency in rendering Veda on flute.

Sri Suprabhata Stotramanimanjari is a sweet scented garland of Suprabhata stotras and verses in praise of gods and goddesses of the Hindu pantheon and the acharyas of the Sringeri and Kanchi mutts. Included in it is also the suprabhata stotra of the Saint-Musician of Tiruvaiyaru Sadguru Tyagarajaswami.

Sri Panchamurti Vinayaka Panchachamara Stuti panchakam is in praise of Sakti Vinayaka, Bhakti Vinayaka, Mukti Vinayaka, Vriddhi Vinayaka and Siddhi Vinayaka of the Vinayaka temple newly constructed on the premises of the Mopeds Scooter factory on the Tirupati—Renigunta Road. This is the only temple in India having the five forms of Vinayaka under a single roof. The Kumbhabhisheka Mahapratishtha of this temple was done by Sri Jayendra Sarasvati Sankaracharya of Kanchi Kamakoti Peetham.

Sri Subrahmanya Suprabhatam contains all the details connected with Sri Subrahmanya Swami having His abode at Tiruttani as described in Kshanikachala puranam, in verses full of devotion. Tiruttani is a famous Subrahmanya kshetra in Tamil nadu where He confers His

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

blessings on the devotees along with Valli, the daughter of Lord Vishnu and Lakshmi, brought up by the hunter-chieftain as his foster-daughter and Devayani. Further, Tiruttani Subrahmanya is the family-deity of the author of this book.

Sri Venkatesvara Visesha Vaibhava Stotram describes the special features observed in the vigraha of Sri Venkatesvara at Tirumala and its worship. Characteristics like matted-hair and serpent-ornaments along with bilvarchana indicate that the vigraha may be looked upon as Siva also. Similarly, the presence of the lion-symbols in the temple and the friday-bath for the Lord, the celebration of Brahmotsavam during the navaratri indicate that the Murthi may represent goddess Shakti too.

Sri Venkatesvara, the author says with tears of devotion in his eyes, appeared in his dream on the night of September 7, 1943 and blessed him to compose this stotram on account of which he calls himself humbly *Venkatesvara-varaprasadakavi*.

The author saw the Kartikeya form too in the vision vouchsafed to him in the dream and he composed *Sri Kartikeyasvarupa Sri Venkatesvara Navaratnamalika*.

Sri Mangapura Prasanna Kalyana Venkatesvara Suprabhatam extols the greatness of Sri Venketesvara at Mangapuram near Tirupati on the Madanapalle road. It is said that Sri Venkatesvara after His marriage with Sri Padmavati at Narayanavanam sojourned here for a brief

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

period as enjoined by the scriptures wherein is stated that a newly-married bridegroom should not ascend a mountain before the expiry of the marriage-diksha period of six months before returning to Tirumala. This poem contains interesting details found in Venkatachalakshetra-puranam.

The story of Sri—Kala—Hasti (Spider, Snake and Elephant) worshipping Siva as culled from the sthala-puranam of Sri Kalahasti temple and other ancient works has been beautifully woven in *Sri Kalahastisvara Suprabhatam*.

Sri Kapilesvara Suprabhatam is in praise of the presiding deities in Kapilesvara temple situated at Tirupati. Devotees generally take their bath in the tirtham (water-falls) here before climbing up the Seven Hills. This is composed specially on the occasion of the Kumbhabhi-shekam of the temple performed in 1971. Lord Venkat-esvara while sending his foster-mother Vakulamalika to Akasaraja to ask for the hand of his daughter in marriage tells her that she on her way should visit the Kapilesvara shrine at the foot of the Hills and request Kapilesvara to bless her efforts. This fact is made special mention of in this stotram.

Sri Kanchi Chandrasekarendrasarasvati acharya prapatti navaratnamaḷika and *Sri Kanchi Jayendrasarasvati acharya prapatti pancharatnam* are composed in reverence to the present pontificial heads of the Kamakoti Peetham.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Sri Valligirisa Subramanya stotram contains the stotram and gadyam in praise of Subrahmanyasvami at Vallimalai where Valli the daughter of Vishnu and a consort of Subrahmanyaswami lived and where the Lord courted and married Valli with the help of his elder brother, Lord Ganesa.

Sringeri Sri Abhinavavidyatirtha acharya prapatti navaratnamalika and *Sringēri Sri Bharati tirtha acharya prapatti navaratnamalika* are panegyrics wherein the author speaks with devotion about the greatness of the present heads of the Sarada Peetham.

Sri Mahalakshmi dandakam and *Sri Sarasvati dandakam* are composed in praise of the goddess of wealth and the goddess of learning in the captivating dandaka poetic form.

The author composed the lyric *Sri Tyagaraja Suprabhatam* at the request of the Sri Tyagabrahma Mahotsava Committee, Tiruvaiyaru which conducts the Aradhana of the illustrious Saint-composer every year there. The salient features pertaining to the life of Sadguru Tyagaraja and his musical compositions have been incorporated in this lyric. This has been rendered in music by Sangitakalanidhi Dr. M. Balamurali Krishna with Vina support from Kalaimamani G. Lakshmanan, Lecturer in Vina, S V. College of Music and Dance, Tirupati and recorded by the Gramaphone Company of India in 1977 in E.P, 7. E.P.E. 1839.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

I am sure this book will find its way into the household of every devout Hindu.

I pray to the Lord of the Seven Hills, Sri Venkatesvara to bless the author with long life, continued health and prosperity so as to enable him to continue to do quiet service to the Vedic religion and Sanskrit.

परोपकाराय फलन्ति वृक्षाः
परोपकाराय वहन्ति नद्यः ।
परोपकाराय चरन्ति गावः
परोपकाराय इदं शरीरम् ।।

Tirupati
17—9—1983.

A. NATARAJAN.*

---

* Secretary, The Tirupati Cultural Association, Tirupati.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.



रचयिता

सलक्षणकृष्णयजुर्वेद भाष्यभिज्ञ,

ज्योतिषाभिज्ञ, वेद भास्कर,

वेद वेणुविशारद, आन्ध्रप्रदेश

प्रभुत्वगौरव संमानितः

वेङ्कटेश्वर वर प्रसाद कविः

मुलुण्ड् वे. रामनाथ घनपाठी

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विज्ञप्तिः

इदमत्र निवेद्यते आर्यमिश्रा महोदयाः

श्रीमत् परमहंस परिव्राजकाचार्यवर्याणां सहृदयानां पण्डित-प्रकाण्डानां च दिव्यसविधे यदद्य समर्प्यमाणेयं "श्रीसुप्रभात स्तोत्र मणिमञ्जरी' नाम-

कलियुगप्रत्यक्षदैवतं कल्याणकल्पद्रुमामिति सर्वत्र जेजीयमानः भगवान् श्री वेङ्कटेशः तदीय करुणाकटाक्षतरङ्गितायां श्री वेङ्कटेश्वर संस्कृत महाविद्या कलाशालायां वेदविभागे प्रवेशप्रदानादिना बाल्यात् प्रभृति दासजनेऽस्मिन् विशेषकटाक्षं प्रसारयति स्म। श्रीकाञ्चीमण्डलमण्डनायमान, मूलाण्डाग्रहाराभिजातानां, श्रीडिण्डिम-कविसार्वभौमानां श्री अरुणगिरिनाथमहोदयानां, श्रीमदप्पय्यदीक्षितेन्द्र-बाल्यगुरूणां श्रीगुरुरामकविमहावरप्रसादीनां, अस्मन्मातुःपितामहानां-मुलुण्ड् बालकविः इति प्रसिद्धानां, अनुग्रहेण तद्वदेव परमाचारशीलानां शिवपूजाधुरन्धराणां अस्मत् पितृपादानां मुलुण्ड् श्री. भास्करवेङ्कटराय शास्त्रिवर्याणां रामेश्वरयात्राबलात्, पञ्चपुत्रिकानन्तरं, षष्ठगर्भे जनित

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पुत्रे मयि अति वात्सल्येन वेदाध्ययनमेव कारयितव्यमिति परमाशयेन वेदविद्याध्यापनमकुर्वन् । मूलपदक्रमपाठानन्तरं तिरुपतिस्थ श्री वेङ्कटेश्वर संस्कृतमहाविद्या कलाशालायां वेदविभागे प्रधानाध्यापकाः 'लक्षणकेसरी' इति विरुदाङ्किताश्च श्री विजयराघवघनपाठिमहोदयाः 'सलक्षण कृष्णयजुर्वेद भाष्यादीन् अबोधयन् ।

भगवान् श्री वेङ्कटेशः स्वीय करुणा कटाक्षप्रसरणेन सलक्षण-घनान्त कृष्णयजुर्वेद वितरणेन सह संस्कृत साहित्य ज्योतिरशास्त्रादिष्वपि प्रावीण्यं तदीय वैभवानुभव परीवाहरूपां कविताशक्ति च पङ्गोरुपरि गङ्गाप्रवाह इव, प्रसादयामास । तद्वरप्रसादकवितां प्रथमतः 'श्री वेङ्कटेश्वर विशेषवैभवस्तोत्रं' श्री कार्तिकेय स्वरूप श्री वेङ्कटेश्वर नवरत्नमालिकां च तद्विशेषवैभववर्णनाय स एव प्रचोदयामास ।

७ - ९ - ४३ दिने ब्राह्मीमुहूर्ते मम स्वप्ने कार्तिकेय हरिहरा-द्यात्मना संदर्शनं च अनुसृत्य तस्य कार्तिकेयादि स्वरूपमपि स्मारं स्मारं श्री वेङ्कटेशस्य स्वरूपं षण्मूर्तिप्रभेद-जटा-नागाभरण धारण-विल्वार्चन-सिंहचिह्ने-त्यादि विशेषमहिमायुक्तं विशिष्टोत्सवऐतिह्यसूचन-पूर्वकं, विशिष्य त्रिमूर्तिस्वरूपेण कार्तिकेय स्वरूपेणच उपवर्णितम् ।

उपर्युपरि तत्कटाक्षमहिम्नैव मुहुर्मुहुः तत्र सुप्रभातस्तोत्रप्रपत्ति-मङ्गलाशासनानि स्मारं स्मारं तदीय सौकुमार्य-माधुर्य-सौभाग्यलावण्य-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मनुसृत्य च तामेव प्रक्रियां " श्री कालहस्तीश्वर सुप्रभातस्तोत्र-प्रपत्ति-मङ्गलाशासनानि " व्यरचयम् । तदुपरि श्रीक्षणिकाचल माहात्म्य-मनुसृत्य ' श्री. सुब्रह्मण्य स्वामि सुप्रभात-स्तोत्र-प्रपत्ति-मङ्गलाशासनानि, एवं तिरुमल-तिरुपति देवस्थानाधिकारिभिः प्रेरितः ' श्री कपिलेश्वर सुप्रभातं,' ' श्री. मङ्गपुर प्रसन्न कल्याण वेङ्कटेश्वर सुप्रभातं च व्यरचयम् । तदुपरि वल्लीगिरिश सुब्रह्मण्य ध्यान-स्तोत्र-प्रपत्ति-मङ्गला-शासनानि एवं गद्यं च व्यरचयम् ।

श्री काञ्ची कामकोटि पीठाधिपानां श्री. श्री. चन्द्रशेखरेन्द्र-सरस्वती श्रीपादानां ' आचार्यप्रपत्तिनवरत्नमालिका ' तथा श्री मज्जयेन्द्र सरस्वती श्री पादानां च ' आचार्य प्रपत्ति पञ्चरत्नम् एवं 'श्री पञ्चमूर्ति विनायक पञ्चचामरस्तुतिपञ्चकं ' च अलिखम् ।

श्री महालक्ष्मीदण्डकं, श्री सरस्वतीदण्डकं, श्री श्री शृङ्गेरि जगद्गुरु श्रीमदभिनवविद्यातीर्थमहास्वामिनां ' आचार्य प्रपत्ति नवरत्न-मालीकां ' एवं श्री. श्री. भारती पीर्थ महास्वामिनां आचार्य प्रपत्ति नवरत्नमालिकां च व्यरचयम् ।

तिरुवय्यारु त्यगराजसङ्गीत विद्वत् समित्यधिकारिणां प्रार्थ-नानुसारेण सङ्गीतशास्त्रनिधीनां श्रीत्यागराजस्वामिपादानां सुप्रभात-स्तोत्र प्रपत्ति-मङ्गलाशासनानि च अलिखम् ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उपर्युक्तानां एतेषां स्तोत्राणां संकलनपूर्वकं "श्रीसुप्रभात स्तोत्रमणिमञ्जरी" इति नाम्ना पुस्तकमेकं प्रकाशनीयम् इति मनीषया तिरुमल-तिरुपति देवस्थान समित्यधिकारिणां सहाय-सहकार-अनुदानेन च मुद्रापयितुं प्रारभे।

"एकस्वादु नभुञ्जीत" इति न्यायेन मदीयं पुस्तकामिदं समवलोक्य "हंसक्षीरन्यायेन" अत्रत्यान् गुणानेव स्वीकृत्य दोषान् मर्षयन्तः महान्तः विद्वांसः सहृदयाः अनुगृह्णन्त्विति अभ्यर्थये।

इति विज्ञापयिता बुधजनविधेयः
सुल्लण्डूं यम्. वि. रामनाथघनपाठी

श्रीवेङ्कटेश्वर प्राच्यकलाशाला, प्रधानाध्यापकः
S. V. O. Collage Ret. Lecturer.
तिरुपति आन्ध्रप्रदेशः

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कृतज्ञता

श्रीकाञ्चीकामकोटिपीठाधिपानां, जगद्गुरुणां श्रीशङ्कराचर्य-वर्याणां कृतज्ञतां समर्पयामि, श्रीशृंगेरी, शारदापीठाधिपानां, जगद्गुरूणां; श्रीशङ्कराचार्य वर्याणां ममकृतज्ञतांसमर्पयामि, केन्द्रीयविद्यापीठाध्यक्षाणां श्रीमल्लादि, द. बालसुब्रह्मण्य महोदयानां, मद्रास्. मैलाप्पूर् संस्कृतमहाकलाशालाध्यक्षाणां. वि. बालकृष्णशास्त्रि महोदयानां, Cultural Association Secretary A. Natarajan महोदयानां, मुद्रणाधिकारिणां, श्री. वि. टि. राजन् महोदयानां, तत्पुत्रवर्याणां, श्रीरमणीमहोदयानां, श्रीचन्द्रमौळिमहोदयानांच, "श्रीसुप्रभातस्तोत्रमणि मञ्जरी" पुस्तकमुद्रणाय सहकारिणां सर्वेषां, तिरुमल, तिरुपतिदेवस्थाना धिकरिणांच, ममकृतज्ञतां आविष्करोमि, श्रीभगवान् कलियुगप्रत्यक्षदेवः श्रीवेङ्कटेशः सर्वेषां सकल आयुरारोग्य भाग्यानि अनु गृह्णन्त्विति तमेवभगवन्तम् अनुपदं अभ्यर्थये

इति

एम्. वि. रामनाथ घनपाठी

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीपञ्चमूर्तिविनायकाः
मोफेड्स्, रेणिगुण्ट.
तिरुपति, (A.P)

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

रेणिगुण्ट समीपस्थ चक्रयन्त्र (मोपेड्स्) निर्माणशालाप्राङ्गणस्थ

श्रीमत् पञ्चमूर्ति विनायक पञ्चचामरस्तुतिपञ्चकम्

शक्ति भक्ति मुक्ति वृद्धि सर्वसिद्धिदायकान्
पञ्चमूर्तिविघ्नराज भक्तबुद्धि चोदकान् ।
रेणिगुण्ट चक्रयन्त्र मार्गगप्रबोधकान्
सर्वदेवपूजकै र्भजामि पूर्वपूजितान् ॥

हस्तिरूपमस्तकान् स्वहस्त भक्ष्यमोदकान्
भक्तियुक्तजीवलोकरक्षकान् गजाननान् ।
षण्मुखस्य पूर्वजान् समस्तदेशसुस्थितान्
सर्वदेव वन्दितान् गणाधिपानहं भजे ॥

काव्यलोक कोविदान् ज्ञानयज्ञदीक्षितान्
ब्रह्मणाऽपि पूजितान् ब्रह्मणामधीश्वरान्
भारतादिलेखकान् समस्तदैत्यनाशकान्
पञ्चमूर्तिं विघ्नराजरूपकान् भजाम्यहम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

चन्द्रशेखरात्मजांस्तु चन्द्रराजशापदान्
चन्दनानुलेपनान् हि फालचन्द्रधारणान् ।
वेदशास्त्रपालकान् सुनादगानलोलुपान्
ज्येष्ठराजनामकान् भजे सुबुद्धिदायकान् ॥

सर्वरोगहारकान् समस्तपापदाहकान्
मङ्गलौघदायकान् समस्तसम्पदः प्रदान् ।
सर्वसिद्धिदैवतान् सर्ववृद्धिदायकान्
पञ्चमूर्तिविघ्नराजरूपिणो नमाम्यहम् ॥

भक्तलोक मानसेषु राजहंसरूपिणाम्
विघ्नराजपञ्चमूर्तिरूपिणां प्रसादनात् ।
लक्ष्मणज्ञ रामनाथ वेदभाष्य सूरिणा
प्रीतिपूर्वपञ्चरत्नमालिका ऽर्प्यतेऽधुना ॥

इति

सादरं समर्पयति
श्री मुल्लण्डूं रामनाथघनपाठी,
श्री वङ्कटेश्वरप्राच्यकलाशाला, वेदप्राध्यापकः
तिरुपति.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्री सुब्रह्मण्य सुप्रभात नक्षत्र मालिका

सुब्रह्मण्य महादेव पार्वती प्रियनन्दन ।
उत्तिष्ठोत्तिष्ठ वल्लीश त्रैलोक्यं मंगळं कुरु ॥
तारकादि वधात्पूर्णं उत्तिष्ठ शिखिवाहन ।
प्रणव ज्ञानबोधेन जगतां रक्षणं कुरु ॥

त्वद्धस्त कुक्कुटरवात् सकलाः प्रबुद्धाः
प्रत्यूष काल इति हि प्रतिपद्य भक्ताः ।
उत्तिष्ठ रक्षितुममून् सततं प्रसन्न
श्री कार्तिकेय शिखिवाहन सुप्रभातम् ॥

भानुः स्वयं प्रतिदिनं तव पाद पद्मम्
स्पृष्ट्वाऽभ्युदेति जगतां सुविबोधनार्थम् ।
अद्यापि सर्वविदितं तदनादि सिद्धम्
श्री कार्तिकेय शिखिवाहन सुप्रभातम् ॥

ब्रह्मेन्द्र विष्णु नुतिभिः प्रतिपन्नतोषः
तेषां मुदे त्वमविलम्बित आविरासीः ।
तत्तत्प्रभावमनुसृत्य फलप्रदातः
श्री कार्तिकेय शिखिवाहन सुप्रभातम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्री षण्मुख प्रथित शंभु विसृष्टवीर्यम्
वैश्वानरोपि न तु धर्तुमभूत्सुशक्तः ।
गंगानदी शरवणोद्गत दिव्यमूर्ते
श्री कार्तिकेय शिखिवाहन सुप्रभातम् ।।

षट्कृत्तिकाभिरभिरक्षित बालकस्त्वं
तस्मात् द्विषड्भुज षडानन सौम्यमूर्ते ।
श्री पार्वती प्रियकुमार दयैकसिन्धो
श्री कार्तिकेय शिखिवाहन सुप्रभातम् ।।

वल्लीविवाहविषये तव चाटु कृत्यं
आश्चर्य भूतमिति सर्वजगत्प्रसिद्धम् ।
त्वं विश्वरूपविभवं प्रकटी करोषि
श्री कार्तिकेय शिखिवाहन सुप्रभातम् ।।

व्याधस्वरूपमभजः प्रथमं गुह त्वम्
वृक्षस्वरूपमुपयात इति द्वितीयम् ।
वृद्धोप्यभूर्नु लवलीं च परीक्षमाणः
श्री कार्तिकेयशिखिवाहन सुप्रभातम् ।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सेनापतित्व मुपयात्विति सर्वदेवैः
संप्रार्थितः सकल शत्रु निबर्हणस्त्वम् ।
सन्तुष्टयेन्द्र सुतयापि वरीवृतोऽसि
श्री कार्तिकेयशिखिवाहन सुप्रभातम् ॥

पार्श्वद्वयेऽपि समुपाश्रित देविकाभ्यां
त्वच्चित्रवर्णशिखिनं दययाधिरूढः
आगत्य पालय मुदा क्षणिकाचलात् त्वं
श्री कार्तिकेय शिखिवाहन सुप्रभातम् ॥

बालः कुमार इति सर्वजनैः स्तुतोऽसि
स्वामी ह्यनन्यसदृशः प्रणतार्तिहन्ता ।
सर्वज्ञ शेखर इति प्रणमन्ति सर्वे
श्री कार्तिकेय शिखिवाहन सुप्रभातम् ॥

त्वत्प्रार्थनार्पणधिया फलमीप्समानाः
अन्नं मयूरमहिकुक्कुट पुष्प मत्स्यान् ।
धृत्वा पयोघटततिं विनयाभ्युपेताः
श्री कार्तिकेय शिखिवाहन सुप्रभातम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्री मन्नगस्त्य मुनिना द्रविडाख्यभाषां
तस्यां समस्त गणितौषध शास्त्रकोशान् ।
लोके प्रचार्य कृपया गुह शंकरोऽसि
श्री कार्तिकेय शिखिवाहन सुप्रभातम् ॥

चक्रप्रयोग मकरोद्धरिरेव पूर्वम्
तत्तारकस्य समभूद्गलहार एव ।
तत्क्षिप्तचक्रमपि वक्षसि लाञ्छनं ते
श्री कार्तिकेय शिखिवाहन सुप्रभातम् ॥

तत्तारकासुरवधं क्षणकाल एव
कृत्वा समस्तजगतां परिरक्षकोऽसि ।
तस्मात्त्वमेव परिपालकमूर्तिरासीः
श्री कार्तिकेय शिखिवाहन सुप्रभातम् ॥

ओंकार तत्त्व विशदीकरणेऽनभिज्ञम्
कारागृहे विधिमहो त्वरया निवेश्य ।
शेषाचले त्वमकरोः किल सृष्टिकार्यम्
श्री कार्तिकेय शिखिवाहन सुप्रभातम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्री वेङ्कटाद्रिशिखरे तव सृष्टिकार्यं
पश्यामि हन्त विपुलं त्वितरत्र नैव ।
अद्यापि विश्वविदितं तव शक्तिवीर्यं
श्री कार्तिकेय शिखिवाहन सुप्रभातम् ॥

रुद्रस्य कार्यमकरोः प्रलयं त्वमेव
विष्णोश्च सर्वजगतीपरिपालनं वै ।
स्रष्टुश्च कार्यमकरोः स्वयमेव सृष्टिम्
श्री कार्तिकेय शिखिवाहन सुप्रभातम् ॥

त्वत्तात एव किल शिष्यवरस्सुजातः
ओंकारतत्त्व मुपदिश्य गुरुर्विभासि ।
ब्रह्मादि सर्व सुरसंघगुरुस्त्वमेव
श्री कार्तिकेय शिखिवाहन सुप्रभातम् ॥

शैलाग्र एव वसतिः तव सर्वदेशे
भार्याद्वयेन सततं परिसेव्यमानः ।
वल्लीसुरेशतनयासहितः प्रसिद्धः
श्री कार्तिकेय शिखिवाहन सुप्रभातम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

त्वद्वासशैल मधिरुह्य तपश्चरेद्यः
तस्मा उपासनफलं क्षणतो ददासि ।
तस्मा दुपास्य गिरिगह्वर देवरूप
श्री कार्तिकेय शिखिवाहन सुप्रभातम् ॥

हे शूरपद्मवधसाहस कार्यदक्ष
तत्तारकासुरवधे जगदेकवीर ।
श्री देवतागणनुत त्रिगुणस्वरूप
श्री कार्तिकेय शिखिवाहन सुप्रभातम् ॥

ब्रह्म स्वरूप मखिलं जगदस्ति तस्मात्
ब्रह्मैकभाव मुपयाहि रघूत्तमेति ।
श्री रामचन्द्रहृदये स्थिरतत्त्वबोधिन्
श्री कार्तिकेय शिखिवाहन सुप्रभातम् ॥

श्री नन्दिकेशतपसा परितुष्यशीघ्रम्
तं स्नापयन् विगळिते शिवतत्वगाङ्गे ।
तस्मै ह्यदा निजवृतं शिवतत्त्वमन्त्रम्
श्री कार्तिकेय शिखिवाहन सुप्रभातम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

येनाद्भुतं त्वमसि सत्कविना प्रगीतः
आसीन् महाकवि रसौ स्थिरसत्यवादी ।
एवं मयाऽद्य कथनात् परितुष्टचित्त
श्री कार्तिकेय शिखिवाहन सुप्रभातम् ॥

श्री कार्तिकेय शिखिवाहन सुप्रभातम्
श्री वेङ्कटेश करुणालहरी प्रभावम् ।
श्री रामनाथ वरभक्तकविप्रणीतम्
नित्यं पठन्तु मनुजाः सकलार्थसिद्ध्यै ॥

॥ श्री सुब्रह्मण्य ध्याननेत्र पुष्पद्वयम् ॥

सुब्रह्मण्यं सुरेशं क्षणिक गिरिपदं षण्मुखं कार्तिकेयम्
श्री वल्लीदेवसेनापति मभयकरं तं मयूराधिरूढम् ।
ओंकारस्यात्मतत्वं प्रणवपरिमळं लोकरक्षैकदीक्षम्
गाङ्गेयं तारकारिं कलियुगवरदं बालमूर्तिं भजेऽहम् ॥

तातस्यापि प्रबोद्धा प्रणवगुरुवरः चक्रदाता हरेश्च
स्रष्टुश्चैवं प्रबोद्धा प्रणवपदरहस्यार्थतत्वं कुमारः ।
कारागार प्रविष्टं विधिमपि कृतवान् वेङ्कटाद्रौ स्वयंतत्–
काले लोकं समस्तं सृजति च विभवात् तंगुहंप्रार्थयेऽहम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ श्री सुब्रह्मण्य स्तोत्रैकादशिनी ॥

प्रथमं तव पुजन माकलयं-
स्तदनन्तर मेव गुहस्य नुतिम् ।
करवाणि गणेश समस्त हितां
सफलांकुरु मे कवितां कृपया ॥

ज्येष्ठराज गणनाथ पाहिमां
स्कन्दराज महिमान्वितस्तवम् ।
रामनाथवचसा प्रगल्भितं
त्वत्प्रसादमहिमान्वितं कुरु ॥

क्षणिकाचलशृङ्ग निवासगुह
क्षणएव विमोचय पापशतम् ।
क्षणकालपदद्वयसंस्मरणात्
प्रणवार्थरहस्य फलं दिश मे ॥

कुटिलालक सुन्दररूप विभो
निटिलानल लोचन सोमसुत ।
निखिलारिविमर्दन कार्यधुर
शिखिवाहन मामव मारमुख ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यवषिष्टमधूनि मुदाकलयं-
स्तवभक्तजनप्रियकार्यकर ।
श्रुतिसीमनि नित्यनिवास विभो
परिपालयमां परया कृपया ॥

गिरिषट्कपदं तव सिद्धमहो
गिरिसप्तकमप्यधिरोहसि भोः ।
गिरिवेङ्कटमूर्ध्नि जगत्सृजनात्
गिरिसप्तकनाथ इति प्रथितः ॥

गिरिजासुत बालकुमार गुरो
गिरिगह्वर एव मुदा वससि ।
सकलागमसन्नुतदिव्यपद
क्षणिकाचल नाथ नमामि सदा ॥

ऋणमोचनकारक भौमपते
ऋणमेव सदा मम तापकरम् ।
ऋणकष्टनिवारणमद्य कुरु
ऋणवान् मनुजः श्रुतिसिद्धमहो ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भवरोग निवारक दिव्यगुरो
ऋणरोगभयापह शक्तिधर ।
भरणं मम सिद्धमिदं भवता
शरणं तव पादयुगं च सदा ॥

त्रिगुणात्मकमूर्तिविशेषविभो
मुखषट्कविभास महेशभव ।
करषट्कयुगेन महास्त्रधर
त्वयि भक्तियुतं कुरु मां सततम् ॥

गणितौषधशास्त्रविकासकर
घटजन्ममुखेन सुबोधकर ।
कवितावलसन् मतिचोदक हे
धिषणां प्रबलां कुरु बालगुरो ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ श्री सुब्रह्मण्य प्रपत्ति दशकम् ॥

शरवण भव मन्त्रं शीघ्रसिद्धिप्रदं तं
शरण मुपगतानां सर्व सम्पत्ति हेतुम् ।
ऋण भय भवरोगान् नाशयन्तं कुमारम्
शरवण भव मूर्तिं कार्तिकेयं प्रपद्ये ॥

अरिगणशतकोटीस्संहरन्तं षडास्यं
हरिमुखसुरसेना रक्षकन्तं ह्युपास्यम् ।
गिरिशिखरनिवासं रक्षकं मानवानां
शरवणभवमूर्तिं कार्तिकेयं प्रपद्ये ॥

सकलगुणयुत श्री सच्चिदानन्दरूपम्
अमल सुजन राजन् मानसे राजहंसम् ।
विमलहृदयसंस्थं भक्तलोकस्य दैवम्
शरवणभवमूर्तिं कार्तिकेयं प्रपद्ये ॥

गणपति मुखपद्मस्यार्क मिन्दीवरास्यं
फणिपति गुहरूपं षण्मुखं कार्तिकेयं ।
अगदगणितशास्त्रं द्राविडे ख्यापयन्तं
शरवणभवमूर्तिं कार्तिकेयं प्रपद्ये ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शिवगुरु तनु भेदो मास्त्विति स्वस्य वाचा
प्रतिवदति शिवस्तान् ब्रह्मविष्ण्वादि देवान् ।
निखिल सुरगणाद्यैः स्तूयमानं गिरिस्थं
शरवणभवमूर्तिं कार्तिकेयं प्रपद्ये ।।

अखिलभुवन रक्षादीक्षितं शक्तिहस्तम्
विकल जनपदानां रक्षणे दीर्घ दृष्टिम् ।
कविकुल भणितीनां मार्ग मादर्शयन्तम्
शरवणभवमूर्तिं कार्तिकेयं प्रपद्ये ।।

सुरगणनुतपादं दैत्यविध्वंसकं च
बुधजनपरितोषं देवसेनापतिं तम् ।
शुभगुण परिपूर्णं योगवल्लीसमेतम्
शरवणभव मूर्तिं कार्तिकेयं प्रपद्ये ।।

प्रणवपद रहस्यज्ञानदातार मीड्यम्
प्रणतिपरजनानां रक्षणे जागरूकम् ।
मुनिगणहृदये त्वां शाश्वतं दीप्तिमन्तम्
शरवण भवमूर्तिं कार्तिकेयं प्रपद्ये ।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अरुणगिरिमखीन्द्रैः श्री स्तुतों स्तूयमानं
अरुणकिरणबालं कोटिसूर्यप्रकाशम् ।
तरणिमिव हि सिन्धोः संस्रुते स्तारकन्तम्
शरवणभव मूर्तिं कार्तिकेयं प्रपद्ये ॥

कलियुग वरद श्री वेङ्कटेश प्रसादात्
बुध वरयुत मूलाण्डाग्रहाराभिजातः ।
न्यरचयदिह सुब्रह्मण्यमूर्ति प्रपत्तिम्
प्रतिदिन पठनार्थं रामनाथोऽति भक्त्या ॥

श्री सुब्रह्मण्य मंगल त्रयोदश मञ्जरिका

पार्वतीश्वर पुत्राय पर्वताग्र निवासिने ।
क्षणिकाचल नाथाय सुब्रह्मण्याय मंगळम् ॥

शूरपद्मादि दैतेय तमो विध्वंस भानवे ।
तारकासुर संहर्त्रे सुब्रह्मण्याय मंगलम् ॥

वल्लीवदनराजीव मधुपाय महात्मने ।
देवसेनासमेताय सुब्रह्मण्याय मंगलम् ॥

कंदर्पकोटिरूपाय कनकाम्बर धारिणे ।
कलिकल्मष नाशाय सुब्रह्मण्याय मंगलम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रणवार्थ स्वरूपाय प्रणतार्ति हराय ते ।
श्रुत्यन्त प्रतिपाद्याय सुब्रह्मण्याय मंगलम् ॥

निखिलासुर कालाय सुरसैन्याभिरक्षिणे ।
सर्वदेवैश्च वन्द्याय सुब्रह्मण्याय मंगलम् ॥

कृत्तिकासूनवे तुभ्यं क्लिन्नमानव रक्षिणे ।
आशुसिद्धि प्रदात्रे ते सुब्रह्मण्याय मंगलम् ॥

बालरूप कुमाराय स्वामिने जगतां गुरोः ।
ज्ञान स्वरूप स्कन्दाय सुब्रह्मण्याय मंगलम् ॥

शक्ति प्रधान देवाय शक्ति कुक्कुट शूलिने ।
शरजन्माग्नि जाताय सुब्रह्मण्याय मंगलम् ॥

कलौयुगे प्रसिद्धाय वरदानगुणाब्धये ।
श्री पूर्णनगरीवास सुब्रह्मण्याय मंगलम् ॥

भक्तानामिष्ट दात्रे ते भक्तपापाप हारिणे ।
भक्तापद्बन्धु मित्राय सुब्रह्मण्याय मंगलम् ॥

कल्हार सुमसाहस्रैः कल्हार सरसीतटे ।
शक्रेण पूजितायास्तु सुब्रह्मण्याय मंगलम् ॥

श्री वल्लीदेवसेनाभ्यां क्षणिकाचल वासिने ।
सर्वज्ञ शेखरायास्तु नित्य श्रीर्नित्य मंगलम् ॥

———

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.



SRI VENKATESWARA SWAMIVARU

Price: 0–50 Ps.
T. T. D. Press, Tirupati

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ श्री वेङ्कटेश्वर विशेषवैभव स्तोत्रम् ॥

आदौ विघ्ननिवारकं गजमुखं नत्वामरैर्वन्दितं
सर्वेष्वेवहि कर्मसु प्रथमतः पूज्यं भवन्तं स्तुवे ।
त्वत्तोऽहं मम सर्वकृत्यनिवहे संरक्षणं प्रार्थयन्
भक्ताभीष्ट फलप्रदात् कविपतेः याचे कवित्वादिकम् ॥

मौळौ रात्नं किरीटं मकरनिभकृते कर्णपत्रे दधानं
शङ्खं चक्रं च वाज्रं भुजतटभुजगं नक्रकण्ठाख्यहारम्
वक्षो भागे च लक्ष्मीं कनकसुवसनं वज्रहस्तं च खड्गं
सौवर्णं चोपवीतं पदनळिनयुगं वेङ्कटेशं भजेऽहम् ॥

मूले ब्राह्मं मध्यतो वैष्णवं च
मौळौ शैवं त्रीणि रूपाणि भान्ति ।
तस्मादेनं स्वस्वमूर्तित्व बुध्या
स्तुत्न्वन् सर्वैः कार्यसाफल्यमेति ॥

पद्मस्थत्वाद्ब्रह्मणो रूपमेति
वक्षोलक्ष्म्या विष्णुरूपत्वमेति ।
शैवं रूपं हस्त नागाज्जटातः
नित्यं स्तुत्यो वेङ्कटेश स्त्रिमूर्तिः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सालग्राम शिलास्वरूप मगमत्स्वस्य प्रभावाद्ध्रुवः
भोग स्त्वैकरतस्तु वेङ्कटपतिर्दिव्यं वपूराजतम् ।
उग्रश्चोत्सवमूर्ति रात्तविभवौ पार्श्वस्थ देवीयुतौ
आस्थानोऽपि च पाञ्चलोह मगमत् कार्तस्वरं मूर्धगः॥

सुब्रह्मण्यमभिब्रुवन्ति विबुधाः केचिद्धरिं मेनिरे
शक्तिं त्वामभिपेदिरे हरिहरं स्तुत्वेतरे पेदिरे ।
तन्नित्यं सकल स्वरूप वितर्तिं त्वय्येव पश्याम्यहम्
तस्मात्वां वरवेङ्कटं कलियुगप्रत्यक्षदैवं भजे ॥

श्री वेङ्कटेशोऽवतु दासमेनं
श्री वेङ्कटेश त्वदुपासकोऽहम् ।
श्री वेङ्कटेशं हृदि भावयामि
श्री वेङ्कटेशेन सुजीवितोऽस्मि ॥

श्री वेङ्कटेशाय नमो नमस्ते
श्री वेङ्कटेशादवने क्षमः कः ?
श्री वेङ्कटेशस्य कथाभिभाषी
श्री वेङ्कटेशेऽस्तु सदा मनो मे ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रातस्स्मरामि मनसा तव सर्वगात्रं
प्रातर्गृणामि वचसा तव सुप्रभातम् ।
प्रातर्नमामि शिरसा तव पादपद्मम्
प्रातः करोमि तव वेङ्कट सर्वदास्यम् ॥

श्री वेङ्कटेश त्वदुपासिका श्रीः
लक्षाण्यलक्ष्यात् प्रददासि भक्तान् ।
लक्षं ह्यलक्ष्यं तव सर्वदा त्वां
लक्षं च लक्ष्याय तव प्रपेदे ॥

विळम्बि संवत्सर वृश्चिकेऽसिते
भृगोर्द्वितीये मृगशीर्ष मे दिने ।
तथैव लक्षं न्यपतद्दिने ऽस्मिन्
तवानुरूपं तदभूतपूर्वम् ॥

चित्रं विचित्रं ह्यति चित्रमेतत्
सपत्र कंदां विधरन् हरिद्रां ।
त्वमेव यासि श्रिय उत्सवान्ते
स्नानाय तद्दातु मुभौ हि वन्दे ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वक्षस्थले चैव सदा स्थितापि
शौके पुरे पश्यसि तां निवेश्य ।
तत्रैव सा तु प्रथिता च नाम्ना
पद्मावती त्यत्रतु सैव लक्ष्मीः ॥

श्री वेङ्कटं बिल्वदळैरदभ्रैः
धनुष्युषस्यन्वह मर्चितन्त्वाम् ।
जटाधरं हस्त भुजङ्ग भूषं
सुचक्र वह्न्यादि धरं नमामि ॥

मुखारविन्दं घनसारशोभितं
करारविन्दं वरदाभयप्रदं ।
पदारविन्दं भवसिन्धुतारकं
शरीरबिम्बं सकलार्थदं भजे ॥

शीर्षे किरीटं नवरत्न संभृतं
श्रुत्योस्तु नक्राकृति कुण्डलद्वयम् ।
हस्ते तु वज्राञ्चितवर्म रम्यं
पदे तु हैमं कवचं बिभर्षि ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पुष्पाङ्गिसेवा गुरुशुक्रयोर्दिने
चलत्यहो द्रष्टुमतीव चित्रं ।
गुरूपदेश स्तव नेत्र दर्शनं
दद्या मतिं लोकगुरुस्त्वमेव ।।

भृगोर्दिनेऽपि प्रददासि दर्शनं
यदाभिषेकः प्रचलत्यहो महान् ।
स्त्रीवेषधारीति मतिं ददासि
त्वमेव माताऽसि पितात्वमेव ।।

सर्व प्रपञ्च सृजने स्वयमेव धाता
तत्पालनेपि समभूः स्वयमेव विष्णुः ।
विश्वप्रपञ्चविलये तु महेश्वरस्त्वं
श्री वेङ्कटेश गिरिराट् त्रिगुणात्मरूपः ।।

श्रीवेङ्कटेश्वरविभोः नवरात्रिकाले
ब्रह्मोत्सवः प्रचलति प्रतिवत्सरेऽपि ।
क्षीराभिषेकमपि हि प्रतिशुक्रवारे
तस्मात् वदन्ति किल शक्तिमयः सदेवः ।।

शक्तिप्रदानसमये स्वयमेव दुर्गा
ह्यैश्वर्यदानसमये स्वयमेवलक्ष्मीः ।
विद्याप्रदानसमये स्वयमेववाणी
श्री वेङ्कटेशविभवात्रिविधा च शक्तिः ।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ कार्तिकेयस्वरूप श्री वेङ्कटेश्वर नवरत्नमालिका॥

। स्थल मुख्यत्व वर्णनम् ।

नित्यं सकल्याण लीलं
नव्य नव्याम्र पत्रोल्लसद्भासि गेहम् ।
कोणेषु शक्त्यङ्क सिंहं
कार्तिकेय स्वरूपं भजे वेङ्कटेशम् ॥ नित्यं स ॥

मूलमूर्तिस्तुतिः—
मौळौ जटाजूटवन्तं
चन्द्रसंज्ञं ललाटे धरन्तं लसन्तम् ।
तल्लीननेत्राब्जयुग्मं
कार्तिकेयस्वरूपं भजे वेङ्कटेशम् ॥ नित्यं स ॥

हरिहरमूर्तिस्तुतिः—
हस्ते विराजद्भुजङ्गं
व्योमराज प्रदत्तं सखड्गं किरीटं ।
वह्निं च चक्रं धरन्तं
कार्तिकेय स्वरूपं भजे वेङ्कटेशम् ॥ नित्यं स ॥

उत्सवमूर्तिस्तुतिः—
वज्रांगिरूपं विचित्रं
तत्तु दिव्योत्सवेषु प्रशस्तं मनोज्ञम् ।
आपादशीर्षं सरत्नं
कार्तिकेय स्वरूपं भजे वेङ्कटेशम् ॥ नित्यं स ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उग्रमूर्तिस्तुतिः—

उग्रस्वरूपं विचित्रं
तस्य संवत्सरे चैकवारोत्सवः स्यात् ।
सूर्योदयात्पूर्वमेव
कार्तिकेय स्वरूपं भजे वेङ्कटेशम् । नित्यं स ॥

भोगमूर्तिस्तुतिः—

साहस्र कुम्भाभिषिक्तं
नित्यपूजाभिषिक्तं सदा भोगमूर्तिं ।
रात्रौ तु मञ्चे शयानं
कर्तिकेय स्वरूपं भजे वेङ्कटेशम् ॥ नित्यं स ॥

आस्थानमूर्तिस्तुतिः—

वेदादि पञ्चाङ्गपाठं
नित्यमायद्धनं सर्वमाकर्णयन्तम् ।
आस्थान राजाधिराजम्
कर्तिकेयस्वरूपं भजे वेङ्कटेशम् ॥ नित्यंस ॥

विमानमूर्तिस्तुतिः—

नित्यं विमाने वसन्तं
भक्त चित्तप्रभासं मनोरम्यगात्रम् ।
कार्तस्वरानन्दमूर्तिं
कार्तिकेय स्वरूपं भजेवेङ्कटेशम् ॥ नित्यं स ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

फलश्रुतिः—

षण्मूर्तिरूप प्रभावं
रामनाथप्रणीतं स्तवं वेङ्कटस्य
नित्यं पठेद्यस्तु भक्त्या
सोऽय मारोग्यमायुर्धनं सौख्यमीयात् ॥ नित्यं स ॥

नवरत्नमालिका समाप्ता

मूकस्वयं स्फुटतरं वदति स्ववाचा
श्रीवेङ्कटेशविभवं बधिरः शृणोति ।
पङ्गुश्चशैलमधिरोहति भक्तियुक्तः
कूणिः स्वयं लिखति तद्विभवं स्वहस्तात् ॥

काणोऽपि तं पठति नेत्रपटुत्वशक्त्या
स्तोत्रं करोति मतिहीननरः स्वबुध्या ।
श्रीवेङ्कटेशमहिमा प्रतिभाति लोके
नित्यं स्तुवन्तु मनुजाः सकलार्थसिध्यै ॥

—०—

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीमङ्गापुर प्रसन्नकल्याण
श्रीवेंकटेश्वरस्वामी.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्री प्रसन्न कल्याणवेङ्कटेशाय नमः

श्री मङ्गापुर प्रसन्न कल्याण वेङ्कटेश्वर

।। सुप्रभातम् ।।

श्रीश प्रसन्न कल्याण वेङ्कटाधिपते प्रभो ।
उत्तिष्ठ कमलाजाने त्रैलोक्यं मङ्गळंकुरु ॥ १ ॥

तोण्डवाडसमीपेतु तोण्डमान्नृपनिर्मिते ।
दिव्यालये प्रसन्नोऽसि जगतां मङ्गलंकुरु ॥ २ ॥

श्रीमन्नगस्त्यविनुतेशवचोभिरेत्य
पद्मावतीपरिणयेन निबद्धदीक्षः ।
मङ्गापुरेवससि शेषगिरेरधस्तात्
कल्याणवेङ्कटविभो तवसुप्रभातम् ॥ ३ ॥

श्रीमत्सुवर्णमुखरीतटनित्यवासः
संतोषदायक इति प्रतिपन्नचेताः ।
एकान्तवास मनुभूय सदाप्रसन्न
कल्याणवेङ्कटविभो तव सुप्रभातम् ॥ ४ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नित्यं सुवर्णमुखरी सलिलावगाहः
नैर्मल्यहेतुरितिवै प्रतिबोधनाय
तद्गाहनेन रमसे विबुधेडयमानः
कयाणवेङ्कटविभो तवसुप्रभातम् ॥ ५ ॥

पद्मावतीशुकपुरे वसतिह्यदूरे
प्रीत्या सदा तव विलोकनपात्रभूता ।
मङ्गापुरे वसतिरत्र तवानुकूला
कल्याणवेङ्कटविभो तवसुप्रभातम् ॥ ६ ॥

श्री तोण्डमान्नरपतिस्तव पूजनाय
मङ्गापुरे तवनिकेतन माततान
तत्रालये निवससीह सुखं प्रसन्न-
-कल्याणवेङ्कटविभो तवसुप्रभातम् ॥

दीक्षाविधान मनुसृत्य चरं स्त्वमेवं
शैलाधिरोहविमुखो निवसस्यधस्तात् ।
धर्मप्रबोधनरतस्सततं प्रसन्न-
-कल्याण वेङ्कटविभो तव सुप्रभातम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्रष्टारजोगुणयुतः परिपालकश्च
सत्वान्वितोननु तमोगुणतोनिहन्ता ।
त्वं विश्वकारणमहो प्रवदन्ति वेदाः
कल्याण वेङ्कटविभो तव सुप्रभातम् ॥

आपन्निवारणधुरीण वरप्रदायिन्
उद्वाहमङ्गळवशाद्वहसीहदीक्षां ।
आरोहणं गिरिवरस्य नकार्यमद्य
कल्याण वेङ्कटविभो तवसुप्रभातम् ॥

कल्याणवेषधर सुन्दर दिव्यमूर्ते
दीक्षाधुरीण करुणामय सर्वशेषिन् ।
लावण्यरत्न निधिरूपलसन्मुखाब्ज
कल्याण वेङ्कटविभो तव सुप्रभातम् ॥

भक्तास्त्वदीय वदनाम्बुरुहेक्षणाय
प्रीत्यागृहीत फलपुष्प मधूपहाराः ।
द्वारे वसन्ति तव मङ्गळ वस्तुहस्ताः
कल्याण वेङ्कटविभो तव सुप्रभातम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सच्चित्प्रमोदमय सद्गुण सर्वसाक्षिन्
सच्चित्तमानस सरोवर राजहंस ।
शेषाद्रिमूलनिकटस्थित सुप्रसन्न-
-कल्याणवेङ्कटविभो तव सुप्रभातम् ॥

मङ्गापुरस्थ महिमान्वित सुप्रसन्न-
-कल्याणवेङ्कटविभोरिह सुप्रभातम् ।
श्री रामनाथ वरभक्तकविप्रणीतं
सर्वे पठन्त्वनुदिनं सकलार्थसिद्धौ ॥

स्तोत्रम्

कमलानन वेङ्कटशैलविभो
कमलासनवन्द्य पदाम्बुरुह ।
कमलाकुच कुङ्कुम रञ्जितहे
कमला तव वक्षसि वासयति ॥

ससुरासुर संस्तुत विश्वविभो
सकलागम सन्नुत दिव्यपद ।
सुमनो हृदयङ्गम लोकपते
सुमतिप्रद मामव मारवर ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

घटजन्म शुभाश्रमवासविभो
मम जन्म समुत्तरणं प्रदिश ।
भव सागर तारक भक्तविभो
कलिकल्मषनाशक लोकगुरो ॥

करुणारस निर्भर लोकपते
तरुणारुणकान्त रमारमण ।
रविमण्डलमध्य निवासविभो
कविमण्डल वर्णित वेदनुत ॥

वरदान विनोदकलीशहरे
सुरदर्पविनाशक शिष्टनुत
शरणागतरक्षणदीक्षितहे
विजयीभव वेङ्कटनाथविभो ॥

स्तोत्रं समाप्तम्

प्रपत्तिः

आजानुबाहु मतिसुन्दर कोमलाङ्गं
आकर्णदीर्घनयनाम्बुजमम्बुजास्यम् ।
आपाद शीर्ष नवरत्नमयं सुदीप्तं
आदित्य वेङ्कट विभुं शरणं प्रपद्ये ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

चन्द्राननं सुमनसां हृदि भासमानं
चन्द्रार्क नेत्रवदनं धृत चन्द्रसंज्ञं ।
छन्दस्सुदीप्त महिमान मचिन्त्यमूर्तिं
चन्द्रेड्य वेङ्कटपतिं शरणं प्रपद्ये ॥

भौमस्वरूप मणिमाभरणेवहन्तं
भौमस्वरूप मृणमोचन कारकन्तं ।
भक्तार्ति भञ्जन मुपास्य जनेप्सितार्थं
कल्याण वेङ्कट विभुं शरणं प्रपद्ये ॥

सौम्य स्वरूप मखिलागम सन्नुताङ्गं
विद्याप्रदान बुधरूप मरिष्ट निघ्नम् ।
विद्यार्थिनो मम विबोधन सुप्रसन्नं
कल्याण वेङ्कट विभुं शरणं प्रपद्ये ॥

त्वामेव सर्व जगतां गुरुरित्यवैमि
त्वत्कार्य निर्वहण कृद्धि बृहस्पतिं वै.
तस्मान्ममापि गुरुरूपबृहस्पतिं त्वां
कल्याण वेङ्कटविभुं शरणं प्रपद्ये ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

६७०

BYBSSMV

दैत्यादि मूर्ख कुजनस्य सुशिक्षणार्थं
शुक्र स्वरूप मुपयात मुदारचित्तम् ।
शुक्रग्रहेण मम दैविक सौख्यदं श्री-
-कल्याण वेङ्कटविभुं शरणं प्रपद्ये ॥

सौरिः स्वयं सकल लोक हितेतरोऽपि
त्वद्भक्तियुक्तजनसंघहितं करोति ।
सर्वैरिहैव शनिवार सुपूजितं श्री
-कल्याण वेङ्कटविभुं शरणं प्रपद्ये ॥

राहुस्स्वयं रवि निशाधिप पीडकोऽपि
त्वन्नाम कीर्तन परान् कलयत्यमोघान् ।
तन्नामभिज्ञ सुजनाः ग्रहणेस्तुवन्ति
कल्याणवेङ्कट विभुं शरणं प्रपद्ये ॥

केतुश्चछिद्रकरणस्सकलेष्टकार्ये
त्वद्भक्त साधुजन संतति रक्षकोऽभूत् ।
एवं नव ग्रहगतिं सुजनानुकूलां
तन्वन्हि पासि भगवन् शरणं प्रपद्ये ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मङ्गळा शासनम्

विवाह दीक्षादक्षाय मङ्गापुर निवासिने ।
दिव्यमङ्गळरूपाय वेङ्कटेशाय मङ्गळम् ॥ १ ॥
श्रीवत्सवक्षसे तुभ्यमगस्त्याश्रम वासिने ।
मङ्गापुरस्थ कल्याण वेङ्कटेशाय मङ्गळम् ॥

पुराण पुरुषायाथ नित्यमङ्गळमूर्तये ।
पुरुषार्थ प्रदायास्तु पुण्यश्लोकाय मङ्गळम् ॥
मङ्गाम्बिका मनोज्ञाय मङ्गापुर निवासिने ।
श्री भूनीळा समेताय श्रीनिवासाय मङ्गळम् ॥

सर्वानु भूतिगम्याय सच्चिदानन्दमूर्तये ।
सर्वान्तर्यामिणेतुभ्यं वेङ्कटेशाय मङ्गळम् ॥
कलौप्रत्यक्ष देवाय कलिकल्मष हारिणे ।
वेदवेदान्त वेद्याय वेङ्कटेशाय मङ्गळम् ॥

अगस्त्याश्रम वासाय सुवर्ण मुखरीतटे ।
विवाह दीक्षानुष्ठात्रे वेङ्कटेशाय मङ्गळम् ॥
सर्वलोक शरण्याय सर्वसम्पत्प्रदायिने ।
सर्व भक्तानु रक्ताय नित्य श्रीर्नित्य मङ्गळम् ॥

समाप्तम्

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.



श्रीज्ञानप्रसूनाम्बासमेत
श्री काळहस्तीश्वरस्वामी,
श्रीकाळहस्ति

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ श्रीकाळहस्तीश्वरसुप्रभातम् ॥

श्रीमद्दक्षिणकैलासवास ! सन्ध्या प्रवर्तते
उत्तिष्ठ गिरिजाजाने त्रैलोक्यं मंगळं कुरु ।
उत्तिष्ठोत्तिष्ठ देवेश उत्तिष्ठ वृषभध्वज
उत्तिष्ठ गिरिजाकान्त त्रैलोक्यं मंगळं कुरु ॥

मातस्समस्तजगतां मदनान्तकस्य
देहार्धहारिणि मनोहरदिव्यमूर्ते ।
ज्ञानप्रसूनमहिते श्रितकल्पवल्लि
श्रीकाळहस्ति-विभुभामिनि सुप्रभातम् ॥

तव सुप्रभातमिह सर्वमङ्गळे
भवतु प्रसन्नशुभमानसांबुजे ।
विधिविष्णुशक्रवनिताभिरर्चिते
क्रिमिकाळहस्तिवरदे भवप्रिये ॥

ज्ञानाम्बिके तव पदाम्बुजलेशतो हि
मूढोऽपि तत्त्वविषयान्सकलांश्च वेत्ति ।
सन्मार्गमानससरोवरराजहंसि
ज्ञानप्रसूनमहिते तव सुप्रभातम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

माता स्वकीयशिशुरक्षणकार्यकाले
मूर्खं शिशुं कथमपि स्ववशीकरोति ।
ज्ञानप्रसूनमहमम्ब मुदाभियाचे
ज्ञानप्रसूनमहिते तव सुप्रभातम् ॥

श्रीमद्गणाधिपति - षण्मुखपूज्यतात
श्रीपार्वतीप्रिय गणेश महेश शम्भो ।
श्रीनन्दिकेश वृषवाहन शूलपाणे
श्रीकाळहस्तिवरदेश्वर सुप्रभातम् ॥

कैलासमूर्ध्न्यनवलोक्य समस्तदेवाः
त्वामत्र सेवितुमहो त्वरयाभ्युपेताः ।
तान् वीक्षितुं समुपतिष्ठ कृपाकटाक्षैः
श्रीकाळहस्तिवरदेश्वर सुप्रभातम् ॥

ब्रह्मा च सृष्टिकरणे तव दर्शनार्थी
विष्णुश्च सर्वजगतां परिपालनेऽपि ।
वैवस्वतोऽपि ननु लोकलये महेश
श्रीकाळहस्तिवरदेश्वर सुप्रभातम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भक्त्या स्वयं त्वदभिषेकनिवेदनार्थी
गंडूषमांसमुपगृह्य मुदाभ्युपेतः ।
कण्णप्प-भक्तशबरः परिपालयैनम्
श्रीकाळहस्तिवरदेश्वर सुप्रभातम् ॥

दिव्याभिषेचनकृते तव सुन्दराङ्ग
नूनं सुवर्णमुखरी सरति त्वदग्रे ।
प्रत्यङ्मुखो वससि तां दययाभ्युपेयाः
श्रीकाळहस्तिवरदेश्वर सुप्रभातम् ॥

कर्पूरमिश्रित-सुवर्णमुखीजलैश्च
कोष्णोदकैरमृतसप्तसुशंखतीर्थैः ।
तिष्ठन्ति वैदिकवरास्त्वभिषेचनाय
श्रीकाळहस्त्यधिपते तव सुप्रभातम् ॥

गोपाङ्गनामधुरगीतनिनादमुग्धाः
मथ्नन्ति पूर्णकलशेषु दधिप्रभूतम् ।
घोषास्सरन्ति परितो गगनोपगूढाः
श्रीकाळहस्त्यधिपते तव सुप्रभातम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भृङ्गास्त्वमी मिळित-झंकृति-गीतनादैः
निर्यान्ति फुल्लसरसीरुहमध्यदेशात् ।
संसेवितुं किल महेश विभो सुरेश
श्रीकाळहस्त्यधिपते तव सुप्रभातम् ॥

पादाङ्गुळैस्समुदितं तव चक्रराजं
सद्योऽददा हि हरये परिपालनाय ।
तादृक्प्रभावमहितौ तव दिव्यपादौ
श्रीकाळहस्त्यधिपते तव सुप्रभातम् ॥

श्रीतन्तुनाभमिभदन्तयुगञ्च सर्पं
त्वल्लिङ्ग एव विधरन् प्रकटीकरोषि ।
वात्सल्यमाश्रितजनेषु महेश शम्भो
श्रीकाळहस्त्यधिपते तव सुप्रभातम् ॥

ईडयो ह्यगस्त्यमुनिनात्र समभ्युपेतः
श्रीविष्णुधातृरविचन्द्रमुखैश्च देवैः ।
तेषामभीष्टवरदं तव पादयुग्मं
श्रीकाळहस्त्यधिपते तव सुप्रभातम् ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मृल्लिङ्गरूपमभजत् शिव आम्रनाथः
अब्लिङ्गरूपमभजत् स तु जम्बुकेशः ।
लिङ्गं च तैजसमभूत् त्वरुणाचलेशः
श्रीकाळहस्त्यधिपतिः खलु वायुलिङ्गम् ॥

आकाशलिङ्गमभवत्स चिदम्बरेशः
लोके समस्तविबुधाः पुरुषाः पुराणाः ।
तत्पञ्चलिङ्गमहिमानमनुस्तुवन्ति
श्रीकाळहस्तिनगरीश्वर सुप्रभातम् ॥

श्रीर्नाम विश्रुतियुतः क्रिमितन्तुवायः
नित्यं स्ववृत्तिवयनात्तव पूजनार्थी ।
तत्पूजनेन परितुष्य फलं ह्यदास्त्वं
श्रीकाळहस्त्यधिपते तव सुप्रभातम् ॥

दिष्टया परस्परनिगूढविरोधिनौ तौ
नागो गजश्च तव भक्तियुतौ समेतौ ।
माणिक्य-तामरसपूजन-कार्यसिद्ध्यै
श्रीकाळहस्त्यधिपते तव सुप्रभातम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

त्वन्नेत्ररक्तपरिपातविषण्णचेताः
क्षिप्त्वा स्वनेत्रमतिभक्तियुतो बभूव ।
मोक्षं ह्यदाः शुभतमं शबराय तस्मै
श्रीकाळहस्त्यधिपते तव सुप्रभातम् ॥

मेरुर्हरिश्च विधिशेषसमुद्रवेदाः
भूम्यग्निचन्द्ररवयोऽप्यनुगाः स्थितास्ते ।
नेत्राग्निनैव दहनं ह्यकरोः पुराणां
श्रीकाळहस्त्यधिपते तव सुप्रभातम् ॥

पूर्वं समुद्रमथने सहसोत्थितं यद्
हालाहलं विषमहो ! दययैव भुक्त्वा ।
लोकैकरक्षक इति प्रथितस्त्वमेव
श्रीकाळहस्त्यधिपते तव सुप्रभातम् ॥

ओंकाररूप जगदीश विराट्स्वरूप
सृष्टिस्थितिप्रळयकार्य-विलासहेतो ।
ब्रह्मेन्द्रविष्णुसुरसेवितपादपीठ
श्रीकाळहस्त्यधिपते तव सुप्रभातम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ढक्कां वरां सरसनृत्तविनोदकाले
सूत्राणि चाप्यइउणादि हलन्तकानि ।
आवाद्य पञ्चनववारमनुग्रहीतुं
श्रीकाळहस्त्यधिपते तव सुप्रभातम् ॥

श्रीरुद्रपाठ-चमकादि-समस्तसूक्तैः
विप्राः पयोदधि-सुगन्ध-सुचन्द्रसंज्ञैः ।
गंगाजलैरुपगतास्त्वभिषेचनाय
श्रीकालहस्त्यधिपते तव सुप्रभातम् ॥

त्वत्पादवीक्षणविधौ हरिरप्यशक्तः
मूर्धावलोकनविधौ विधिरप्यशक्तः ।
त्वं विश्वरूपविभवो जगति प्रसिद्धः
श्रीकाळहस्त्यधिपते तव सुप्रभातम् ॥

श्रीकाळहस्त्यधिपतेरिह सुप्रभातम्
श्रीरामनाथ-वरभक्त-कविप्रणीतम् ।
ये मानवाः प्रतिदिनं पठितुं प्रवृत्ताः
ते प्राप्नुवन्ति महिताः सकलार्थसिद्धिम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ स्तोत्रम् ॥

गणानां पतिं विघ्नहन्तारमीडे
कवीनां कविं सर्वकार्यादिपूज्यम् ।
महाज्ञानिनां ज्ञानसम्पत्तिहेतुं
सदा सर्वसम्पत्प्रदं ज्येष्ठराजम् ॥

मयूराधिरूढं श्रियाऽभिज्वलन्तं
पुळिन्दापतिं देवसेनापतिं च ।
स्वपार्श्वस्थदेवीयुतं षण्मुखं तं
सदा कार्तिकेयं भजे शम्भुसूनुम् ॥

नमामीशमव्यक्तवेदस्वरूपं
प्रभुं नीलकण्ठं सदाऽऽनन्दरूपम् ।
शिवं सङ्गमेशं पुरारिं सुरेशं
सदाऽहं भजे सर्वदेहे ज्वलन्तम् ॥

स्वमौळौ तु गङ्गार्धचन्द्रौ वहन्तं
चिदोङ्कारमूलं महादेवमूर्तिम् ।
ललाटे स्फुरच्चन्द्रसूर्याग्निनेत्रम्
प्रभातेऽनिशं भक्तिपूर्वं भजेऽहम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

चलत्कुण्डलं चारुगण्डं महेशं
भवाब्धिप्रतारं प्रभुं शूलपाणिम् ।
स्वनेत्राग्निना दग्धमारं पुरारिं
भजे सर्वदा त्वामहं रक्ष शम्भो ॥

विना नैव जानाम्यहं शङ्करं त्वां
सुबोद्धुं हरिब्रह्मदेवैरशक्यम् ।
अनाथः प्रपद्ये सनाथं कुरु त्वं
सदा मङ्गळाभं शिवं भावयेऽहम् ॥

गिरिजार्धशरीरविलासविभो
त्वयि भक्तजनावन धीर शिव ।
मम सर्वभयापह शक्तियुत
सकलात्मसु नित्यनिवास शिव ॥

विधिविष्णुशतक्रतुदेवगणै-
रभिवन्दितदिव्यपदाम्बुरुह ।
सकलोपनिषत्प्रतिपाद्य विभो
जगदेकसुरक्षणकार्यनिधे ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सकलागमदर्शनवेदनुत
प्रतिपालय सर्वजनाभिनत ।
हरिमोहनमोहसुरूपविभो
भवपापशतान्मम मोक्षकर ॥

प्रथमो भव सर्वजगत्तरणे
त्रिजगत्प्रथित त्रिगुणातिगत ।
प्रणमज्जनरक्षकपादयुग
प्रणमामि सदा तव पादयुगम् ॥

लोकान् समस्तानपि धारयन्तं
सृष्टेः स्थितेश्चापि लयस्य हेतुं ।
आद्यन्तशून्यं तमनादिदेवं
भक्तेष्टदातारमहं प्रपद्ये ॥

यं वेदान्ता नाभिजानन्ति शम्भुं
यस्मान्नित्या वेदवाचः प्रवृत्ताः ।
यं ब्रह्माद्या नैव जानन्ति सोऽयं
नित्यं स्तुत्यो ज्ञानसूनाम्बिकेशः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यन्निश्वासो वेदजालं समस्तं
यत्पादाब्जं विश्वतो मङ्गळं च ।
यो यज्ञेशः सोऽयमम्बासमेतः
नित्यं स्तुत्यो ज्ञानसूनाम्बिकेशः ॥

यं सर्वेशं तत्त्वतो योगनिष्ठाः
विज्ञानेशं पूजयन्त्यादरेण ।
सोऽयं विष्वङ् सर्ववेदान्तवेद्यः
नित्यं स्तुत्यो ज्ञानसूनाम्बिकेशः ॥

यस्य स्मृत्वा सर्वपापौघनाशः
यत्पूजातो घोरसंसारनाशः ।
यस्य स्तुत्या मुक्तिराप्तैव सोऽयं
नित्यं स्तुत्यो ज्ञानसूनाम्बिकेशः ॥

॥ प्रपत्तिः ॥

पञ्चाक्षरीमनुनिवासमशीतशीत-
भान्वग्निरूपनयनं जटिलं त्रिणेत्रम् ।
श्रीरामनाथकविमानसराजहंसं
श्रीकालहस्त्यधिपतिं शरणं प्रपद्ये ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पार्श्वद्वये गणपतिं वरकार्तिकेयं
देहार्धभागमिळितां परदेवताञ्च ।
भक्तेष्टदाननिरतं शशिखण्डगौरं
श्रीकाळहस्त्यधिपतिं शरणं प्रपद्ये ॥

फालाक्षिकीललवदग्धपुरत्रयञ्च
भक्ताखिलार्थदकृपार्द्रविलोचनम् तम् ।
भस्माङ्गरागफणिभूषणभूषिताङ्गं
श्रीकाळहस्त्यधिपतिं शरणं प्रपद्ये ॥

भागीरथीशशिधरं श्रुतिमौळिगम्यं
कालान्तकं कविवरं सकलश्रुतीनाम् ।
लोकस्थितिप्रभवभङ्गकृदीक्षणन्तं
श्रीकाळहस्त्यधिपतिं शरणं प्रपद्ये ॥

नित्यं विशुद्धममलं परिपूर्णतत्त्वं
सत्यं परं परमकारणमद्वितीयम् ।
वाणीरमाधवमुखामरसेवितं तं
श्रीकाळहस्त्यधिपतिं शरणं प्रपद्ये ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सव्याङ्गजो विधिरभूत्किल सृष्टिकर्ता
वामाङ्गजो हरिरभूत् स्थितिपालकश्च ।
आद्यन्तशून्यविभवं च विराट्-स्वरूपं
श्रीकाळहस्त्यधिपतिं शरणं प्रपद्ये ॥

सृष्टिस्थितिप्रळयकारणमात्मतत्त्वं
विश्वाधिकं विनतलोकविशेषकल्पम् ।
मन्दस्मितत्रुटितशत्रुपुरं क्षणेन
श्रीकाळहस्त्यधिपतिं शरणं प्रपद्ये ॥

हस्तस्फुरत्कुलिशशूल-कुठारखड्ग-
घण्टाद्युषर्बुध-वराभयपाशमीशम् ।
संसारसागरमहाभयतारकाङ्घ्रिं
श्रीकाळहस्त्यधिपतिं शरणं प्रपद्ये ॥

अग्निर्मुखं, शशिरवी नयने, दिशस्तु
श्रोत्रे, वचांसि निगमाः, श्वसनस्समीरः ।
विश्वं हृदङ्घ्रियुगळं पृथिवी च यस्य
श्रीकाळहस्त्यधिपतिं शरणं प्रपद्ये ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वेदा भणन्ति किल निश्वसितं यदीयं
सुप्तिं समस्तजगतां प्रळयं यदीयाम् ।
ज्ञानप्रसूनकलिकाकलितार्धदेहं
श्रीकाळहस्त्यधिपतिं शरणं प्रपद्ये ॥

ब्रह्मेन्द्र-विष्णुरवि-चन्द्रमयूरकाळ-
श्रीदन्तिराजसुभगा विजयार्तिनाशम् ।
भक्तार्तिनाशनकला परिपूर्णशम्भुं
श्रीकालहस्त्यधिपतिं शरणं प्रपद्ये ॥

पश्यन्ति यं सकलवस्तुषु सन्तमीशं
यस्मिन् जगच्च वरयोगविशुद्धसत्त्वाः ।
नित्यं निषादवरलोचनचिह्नितास्यम्
श्रीकाळहस्त्यधिपतिं शरणं प्रपद्ये ॥

पञ्चाननं हरिविरिञ्चिनुतापदानं
अप्राकृताकृतिमनन्तगुणाभिरामम् ।
आनन्दसिन्धुमखिलश्रुतितत्त्वसारं
श्रीकाळहस्त्यधिपतिं शरणं प्रपद्ये ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पूजां सहस्रकुसुमैः सरसीरुहाणां
कर्तुं तथा व्यवसितः परचिन्त्यचैकं ।
न्यूनं हरिस्स्वनयनं सहसार्पयत्तं
श्रीकाळहस्त्यधिपतिं शरणं प्रपद्ये ॥

वाणी च नादयति नादमयीं स्ववीणां
सङ्गीतगानरसिकैः सह गायति श्रीः ।
तन्त्रीनिनादतरुणीमणिगानलोलां
ज्ञानाम्बिकां शिवसतीं शरणं प्रपद्ये ॥

॥ मङ्गळश्लोकाः ॥

ज्ञानप्रसूनतुष्टाय ज्ञानसूनाम्बिकायुजे ।
श्रीकाळहस्तिनाथाय महादेवाय मङ्गळम् ॥

विघ्नेशस्य कुमारस्य चोभयोर्जनकाय ते ।
श्रीकाळहस्तिनाथाय महादेवाय मङ्गळम् ॥

श्रीमद्दक्षिणकैलासनित्यवासाय शम्भवे ।
श्रीकाळहस्तिनाथाय महादेवाय मङ्गळम् ॥

अगस्त्यस्तुतिहृष्टाय सर्वदेवार्चिताय ते ।
श्रीकाळहस्तिनाथाय महादेवाय मङ्गळम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मोहिनीमोहरूपाय मोक्षदात्रे महात्मने ।
श्रीकाळहस्तिनाथाय महादेवाय मङ्गळम् ॥

वागीशविष्णुपूज्याय सर्वलोकस्तुताय ते ।
श्रीकाळहस्तिनाथाय महादेवाय मङ्गळम् ॥

विराड्रूपप्रसिद्धाय ब्रह्मविष्णुशिवात्मने ।
श्रीकाळहस्तिनाथाय महादेवाय मङ्गळम् ॥

पञ्चलिङ्गस्वरूपेषु वायुलिङ्गस्वरूपिणे ।
श्रीकाळहस्तिनाथाय महादेवाय मङ्गळम् ॥

किरातनेत्रस्वीकर्त्रे तस्य मोक्षप्रदायिने ।
श्रीकाळहस्तिनाथाय महादेवाय मङ्गळम् ॥

श्रीख्याततन्तुवायस्य क्रिमेर्मोक्षप्रदायिने ।
श्रीकाळहस्तिनाथाय महादेवाय मङ्गळम् ॥

काळस्य हस्तिराजस्य चैकदा मुक्तिहेतवे ।
श्रीकाळहस्तिनाथाय महादेवाय मङ्गळम् ॥

त्रिलिङ्गेष्वेकलिङ्गाय चित्रलिङ्गस्वरूपिणे ।
श्रीकाळहस्तिनाथाय महादेवाय मङ्गळम् ॥

घनसारोष्णतीर्थैश्च सप्तशंखमितैर्वरैः ।
सदाऽभिषिक्तरूपाय महादेवाय मङ्गळम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

महान्यास-महारुद्रैः अभिषिक्ताय शम्भवे ।
श्रीकाळहस्तिनाथाय महादेवाय मङ्गळम् ॥
सर्वान्तर्यामिणे तस्मै सृष्टिस्थित्यन्तकारिणे ।
श्रीकाळहस्तिनाथाय महादेवाय मङ्गळम् ॥

जगद्रक्षणकार्याय कालकूटविषाशिने ।
श्रीकाळहस्तिनाथाय महादेवाय मङ्गळम् ॥
ज्ञानसूनाम्बिकाभर्त्रे लोकभर्त्रे शिवात्मने ।
श्रीकाळहस्तिनाथाय नित्यश्रीः नित्यमङ्गळम् ॥

—०—

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ श्रीकपिलेश्वरसुप्रभातम् ॥

कपिलेश्वर देवेश प्रातस्सन्ध्या प्रवर्तते ।
उत्तिष्ठ कपिलाराध्य त्रैलोक्यं मंगलं कुरु ॥
पातालोत्थित लिङ्गेश वृषभध्वज हे प्रभो ।
कामाक्षीवल्लभोत्तिष्ठ जगतां मङ्गलं कुरु ॥

पातालिङ्ग कपिलेन सुपूजितस्त्वं
भूमिं विभिद्य सहसा परिवर्धमानः ।
श्रीवेंङ्कटाद्रिकुहरे भुवि चाविरासीः ।
कामाक्ष्यधीश कपिलेश्वर सुप्रभातम् ॥

त्वत्पार्श्वभागगिरिनिर्झरपूतधारा
ह्यान्तर्यकष्टमखिलं विनिवारयन्ती ।
अन्तर्मनस्यति कुतूहलमातनोति
कामाक्ष्यधीश कपिलेश्वर सुप्रभातम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्री कपिलेश्वरस्वामी

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

त्वद्भक्तियुक्तकपिलाख्यमुनेः प्रभावात्
तत्प्रार्थनामनुगते कपिलाख्यतीर्थे ।
स्नात्वा वसन्ति सुजनास्तव दर्शनार्थम्
कामाक्ष्यधीश कपिलेश्वर सुप्रभातम् ॥

विघ्नेश्वरं प्रथमतः प्रणमन्ति सर्वे
श्रीषण्मुखं च तदनन्तरमेव भक्ताः ।
त्वद्दर्शनं विदधते भवमोचनाय
कामाक्ष्यधीश कपिलेश्वर सुप्रभातम् ॥

श्रीमातरं शिवसमादृतभाग्यमूर्तिम्
कामाक्ष्यभिख्यशिवशक्तिमनस्तुवन्ति ।
सर्वैस्त्वदीयमहिमा जगति प्रसिद्धः
कामाक्ष्यधीश कपिलेश्वर सुप्रभातम् ॥

श्रीवेङ्कटेश्वरविवाहविनिश्चयार्थम्
श्रीवेङ्कटेशवचसा वकुळा ययाचे ।
तत्प्रार्थनामनु विवाहवरप्रदातः
कामाक्ष्यधीश कपिलेश्वर सुप्रभातम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ब्रह्मा स्वयं पशुपते पशुरूपमेत्य
क्षीराभिषेकमकरोत्किल पूर्वमत्र ।
गोपालरूपमधिगच्छति केशवोऽपि
कामाक्ष्यधीश कपिलेश्वर सुप्रभातम् ॥

तल्लिङ्ग एव वसतामिति याचितौ तौ
तादृक्प्रभावमुनिना विधिकेशवौ स्तः ।
मूर्तित्रयात्मक महेश्वरलिङ्गरूप
कामाक्ष्यधीश कपिलेश्वर सुप्रभातम् ॥

भूलोकनाथ कपीलेश्वर सुप्रभातम्
श्रीरामनाथवरभक्तकविप्रणीतम् ।
भक्त्या स्वयं प्रतिदिनं भुवि ये पठन्ति
सम्प्राप्नुवन्ति परमां सकलार्थ सिद्धिम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ ध्यानम् ॥

कूर्मस्योपरि सुस्थिते फणिपतौ तन्मूर्ध्नि भूमौ स्थितम्
लिङ्गं गोः पयसाभिषेचकमजं गोपालरूपं हरिम् ।
तत्रैवं कपिलर्षिणा परमया भक्त्या सुमैः पूजितम्
दृश्यं चित्रमहो त्रिमूर्तिमिळितं ध्यायामि लिङ्गोत्तमम् ॥

श्रीनिवास उवाच—

त्वं गच्छाधः प्रदेशे च कापिलं लिङ्गमुत्तमम् ।
तत्रास्ते तीर्थराजो यः कपिलेश्वरसन्निधौ ॥

तत्र स्नात्वा यथा योग्यं मदर्थं तीर्थपुङ्गवे ।
कपिलेश्वरमासाद्य याच्यतां वरमव्ययम् ॥

श्रीनिवासेन बालेन सदा कल्याणकांक्षिणा ।
प्रेषिताहं तदर्थं वै कुरु मेऽभीप्सितं प्रियम् ॥

॥ इति भविष्योत्तरपुराणे प्रोक्तम्

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कपिलेश्वर स्तोत्रम् ॥

कपिलमहामुनिपूजितलिङ्गं
सकलसुरासुरवन्दितलिङ्गम् ।
भुवि जनरक्षणकारणलिङ्गं
नमत महाकपिलेश्वरलिङ्गम् ॥

पातालाद्भुवि चोत्थितलिङ्गं
निर्झरपातविराजितलिङ्गम् ।
सिद्धिविनायकषण्मुखलिङ्गं
नौमि महाकपिलेश्वरलिङ्गम् ॥

वेङ्कटनायकमानितलिङ्गं
प्रेरितवकुळाप्रार्थितलिङ्गम् ।
वैवाहिकमनुमोदकलिङ्गं
नौमि महाकपिलेश्वरलिङ्गम् ॥

कालकूटविषभूषणलिङ्गं
कालनिवारणकारकलिङ्गम् ।
कालचक्रपरिसेवितलिङ्गं
नौमि महाकपिलेश्वरलिङ्गम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ब्रह्ममुरारिमहेश्वरलिङ्गं
सृष्टिस्थितिलयकारकलिङ्गम् ।
सर्वदोषपरिहारकलिङ्गं
नौमि महाकपिलेश्वरलिङ्गम् ॥

श्रीमदगस्त्यसुनामकलिङ्गं
कोटिलिङ्गपरिसूचकलिङ्गम् ।
भास्करमण्डलभासकलिङ्गं
नौमि महाकपिलेश्वरलिङ्गम् ॥

श्रीकपिलेश्वरप्रपत्तिः ।

पञ्चाक्षरीमनुनिवासमघोररूपं
पञ्चाननं भगवतीगिरिजासमेतम् ।
चन्द्रार्कवह्निनयनं जटिलं महेशं
चन्द्रार्धचूडशिरसं शरणं प्रपद्ये ॥ १ ॥

ढक्कां मृगं वरदमग्निशिखां धरंतं
भक्तार्तिभञ्जनचणं सकलार्थदं तम् ।
दुष्टस्य खण्डनविधौ पटुरुद्रमूर्तिं
मूर्तित्रयात्मकपिलेशमहं प्रपद्ये ॥ २ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सृष्टिस्थितिप्रळयकेलिविलोलमीशं
वेदैकवेद्यमहिमानमचिन्त्यमूर्तिं ।
ओंकाररूपमखिलागमतत्वसारं
ज्ञानप्रदं शिवमहं शरणं प्रपद्ये ॥ ३ ॥

नेत्रेन्दुना सकलतापविमोचकं तम्
नेत्राग्निना सकलशत्रुनिबर्हणं च ।
नेत्रार्कशक्तिलयरक्षणसृष्टिहेतुं
कामाक्ष्यधीशकपिलेशमहं प्रपद्ये ॥ ४ ॥

हंसस्वरूपमुपयाति हि सोऽहमेत्य
श्रीरामनाथकविमानसराजहंसः ।
कामाक्ष्यधीशकपिलेश्वरसुप्रपत्तिं
नित्यं पठन्तु मनुजास्सकलार्थ सिद्ध्यै ॥ ५ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ श्रीकपिलेश्वरमङ्गळम् ॥

विघ्नेश्वराय देवाय शर्वपुत्राय मङ्गळम् ।
वल्लीसेनासमेताय सुब्रह्मण्याय मङ्गळम् ॥

श्रीकामाक्ष्यै जगन्मात्रे महादेव्यै च मङ्गळम् ।
कपिलेश्वररूपाय महादेवाय मङ्गळम् ॥

पाताललोकादुद्भूय भक्तानुग्रहकारिणे ।
भूलोकनित्यवासाय देवदेवाय मङ्गळम् ॥

नमश्शिवाय शान्ताय सर्वाभीष्टप्रदायिने ।
अगस्त्येश्वरलिङ्गाय कोटिलिङ्गाय मङ्गळम् ॥

आदिमध्यान्तशून्याय महाप्रलयसाक्षिणे ।
पञ्चब्रह्मस्वरूपाय त्र्यम्बकाय च मङ्गळम् ॥

वेङ्कटाद्रेः परिसरे कपिलाख्यसरस्तटे ।
गिरिनिर्झरसुप्रान्ते नित्यवासाय मङ्गळम् ॥

कैलासशिखरावासपरब्रह्मस्वरूपिणे ।
कामाक्षीवल्लभायास्तु कपिलेशाय मङ्गळम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्री श्री श्री काञ्ची कामकोटिपीठाधिपानां श्रीचन्द्र-
शेखरेन्द्रसरस्वतीस्वामिपादानां अष्टसप्ततितमे
वर्षारम्भे प्रचलितजयन्तीमहोत्सवसमये
मुल्लण्डरं राम नाथ घनपाठिना
समर्पिता

आचार्य प्रपत्तिनवरत्नमालिका

श्रीकामकोटिबिरुदाङ्कितपीठसंस्थान्
सर्वज्ञपीठमधिरूढवतां पदस्थान् ।
अस्मिन् युगे चलनदैवमिति प्रसिद्धान्
श्रीचन्द्रशेखरयतीन्द्रगुरून् प्रपद्ये ॥ १ ॥

श्रीचन्द्रमौळिशिवपूजनपूतदेहान्
श्रीशारदार्चनकलोद्गतवाग्विलासान् ।
कामाक्ष्यनुग्रहसुमामृतसत्कटाक्षान्
श्रीचन्द्रशेखरयतीन्द्रगुरून् प्रपद्ये ॥ २ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.



काञ्चीकामकोठिपीठाधिपति श्रीजयेन्द्रसरस्वतीस्वामिपादाः

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आचार्यशंकरगुरोरपरावतारान्
प्राचीनशास्त्रपरिरक्षणकार्यदक्षान् ।
नास्तिक्यवादिजनसंघमनः प्रभेत्तॄन्
श्रीचन्द्रशेखरयतीन्द्रगुरून् प्रपद्ये ॥ ३ ॥

वेदागमप्रवचनाय धनप्रदातॄन्
वेदार्थमप्यखिललक्षणतः प्रबोद्धॄन् ।
वेदान्ततत्त्वविशदीकरणे प्रवीणान्
श्रीचन्द्रशेखरयतीन्द्रगुरून् प्रपद्ये ॥ ४ ॥

आसेतुशीतनगसन्नुतदिव्यपादान्
देशान्तरागतसुधीभ्रमरांघ्रिपद्मान् ।
विश्वासमूर्तिरिति विश्वजनैः प्रशस्तान्
श्रीचन्द्रशेखरयतीन्द्रगुरून् प्रपद्ये ॥ ५ ॥

श्रीवेंकटेशमहमद्य मुदाभियाचे
श्रीचन्द्रशेखरयतीन्द्रशतायुषार्थम् ।
अद्याष्टसप्ततिजयन्तिमहोत्सवेऽस्मिन्
जेजीयतात् सकलभक्तजनावनाय ॥ ६ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

गोग्रासमर्पणविधिं स्वयमेव कुर्वन्
भक्तप्रबोधनपरा वितरन्ति तेऽद्य ।
मृत्युंजयायुषहवं नमकस्य होमं
कार्वेटिनामनगरे चलतीह भक्तैः ॥ ७ ॥

जयतु जयतु नित्यं चन्द्रचूडेन्द्रपादः,
जयतु जयतु लोके धर्मबोधेन्द्रपादः ।
जयतु जयतु नित्यं वेदशास्त्रागमाद्याः,
जयतु जयतु नित्यं चायुरारोग्यवन्तः ॥ ८ ॥

गुर्वष्टकं व्यरचयत् स्वयमेव भक्त्या
मुल्लण्डराभिजनकिंकररामनाथः ।
श्रीचन्द्रशेखरयतीन्द्रमहाप्रभावं नित्यं
पठन्तु मनुजास्सकलार्थसिद्ध्यै ॥ ९ ॥

—०—

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.



श्री शंकरानन्देन्द्र सरस्वतीस्वामिपादाः

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ आचार्यप्रपत्तिपञ्चरत्नम् ॥

आचार्यवद्गुणविभूषितदिव्यमूर्तीन्
बाल्ये वयस्यपि च सज्जनपूजनीयान् ।
तेजःश्रिया श्रुतिधिया च विशेषपूज्यान्
श्रीमज्जयेन्द्रयतिराजगुरून्प्रपद्ये ॥

श्रीचन्द्रशेखरयतीन्द्रसरस्वतीनाम्
शिष्यांश्च सर्वविषयेऽपि समानरूपान् ।
श्रीबालयोगिसुविशेषणपूज्यपादान्
श्रीमज्जयेन्द्रयतिराजगुरून्प्रपद्ये ॥

श्रीशारदाभगवतीसमुपासनाढ्यान्
श्रीचन्द्रमौलिशिवपूजनभाग्ययुक्तान् ।
कांचीपुरे प्रथितशङ्करपीठसंस्थान्
श्रीमज्जयेन्द्रयतिराजगुरून्प्रपद्ये ॥

वेदागमादिसमयोद्धरणप्रमोदान्
अस्मादृशानपि च पावयितुं प्रसन्नान् ।
छात्रौघपाठनविशेषकलाप्रपूर्णान्
श्रीमज्जयेन्द्रयतिराजगुरून्प्रपद्ये ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शास्त्रार्थतत्त्वविषयेष्वतिसूक्ष्मबुद्धीन्
सर्वेश्वरस्य सुतवद्यतिराजसूनून् ।
शिष्यौघषट्पदसरोरुहसुस्वरूपान्
श्रीमज्जयेन्द्रयतिराजगुरून्प्रपद्ये ॥

श्रीवेङ्कटेश्वरकवित्ववरप्रसादात्
मुल्लण्डराभिजनकिंकररामनाथः ।
भक्त्या स्वयं व्यरचयद्गुरुपञ्चरत्नम्
श्रीमज्जयेन्द्रयतिराजगुरुप्रभावम् ॥

—०—

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ श्रीवल्लीगिरीश-सुब्रह्मण्य-सुप्रभातम् ॥

॥ ध्यानम् ॥

श्रीवल्लीशैलदेवं विबुधगुरुवरं कार्तिकेयं गुहंतम्
नीवातीरे निवासं गजमुखवदनेनैव कल्याणमूर्तिम् ।
चित्रं तद्विष्णुरेव श्वशुर इति पुराणोक्तरीत्या च वेद्मि
विष्णोर्जामातरं त्वां कनकमृगवरोद्भूतवल्लीं भजेऽहम् ॥ १ ॥

गिरिजासुतवल्यचलेश विभो
गिरिशस्य कुमारगुहप्रथित ।
गिरिगह्वरवास सुरेशगुरो
गिरिनाथ तवांघ्रियुगं शरणम् ॥ २ ॥

गिरिषट्क इति प्रथितोऽसि भुवि
गिरिसप्तकनाथ इति प्रबलः ।
गिरिरष्टम एष इतीह मतिः
गिरिगह्वर एव नमामि सदा ॥ ३ ॥

वल्लीगिरिगुहवासविनोद
मल्लीमरुवक वासनयाऽत्र ।
रंभापनस सुधाम्रफलैश्च
पिष्टेमधुमति तुष्ट भजे त्वाम् ॥ ४ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शरवणजात गुहामरनाथ
अनुपमषण्मुखसुन्दररूप ।
सकलसुरासुरवन्दितपाद
हरसुतभक्तमनोहरबाल ॥ ५ ॥

नीवानदीतीरनिवासकोऽसि
भूपालमौलि श्रितपादुकोऽसि ।
सर्वामरैः प्रार्थितदेवताऽसि
वल्लीगिरीशप्रणतोऽस्मि नित्यम् ॥ ६ ॥

मुखारविन्दं तव षड्विधं हि
करारविन्दन्तु तथा द्विषट्कम् ।
पदारविन्दद्वितयं भजन्ते
शरीरबिम्बं सकलार्थदं च ॥ ७ ॥

शक्तिशूलशरचापसुघण्टा-
खड्गखेटवरकुक्कुटपाशैः ।
अङ्कुशाभयवरप्रदमुद्रैः
आजितांश्च कलये गुहहस्तान् ॥ ८ ॥

—०—

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रपत्तिः

वल्लीविवाहसुमनस्त्वरयाऽऽगतंतम्
वल्लीविहारसुमनोहर-भाग्यशैले ।
वल्लीनिकुञ्जमुपभुज्य मुदा प्रसन्नम्
वल्लीगिरीश्वरगुहं शरणं प्रपद्ये ॥

नीवानदीतट-विराजित-पर्वताग्रे
नीवारघासमसृणन्तु कटायितन्ते ।
नीराजनं तव रविः स्वयमेव भाति
वल्लीगिरीश्वरगुहं शरणं प्रपद्ये ॥

त्वत्पादपद्मयुगलं विधुनोति दोषान्
त्वद्धस्तषट्कयुगलं प्रददाति कामान् ।
त्वद्वक्त्रषट्कमतुलं विवृणोति वेदान्
वल्लीगिरीश्वरगुहं शरणं प्रपद्ये ॥

पूजार्थमत्र विबुधाः निजमानसास्ते
पुष्पाणि सर्वरुचिराणि फलानि धृत्वा ।
द्वारे वसन्ति सकलानपि तोषयन्तम्
वल्लीगिरीश्वरगुहं शरणं प्रपद्ये ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

बुधवरयुत-मूलाण्डाग्रहाराभिजातैः
अरुणगिरिमखीन्द्रैः श्रीस्तुतौ स्तूयमानम् ।
अरुणकिरणबालं कोटिसूर्यप्रकाशम्
कलियुगवरदं तं बालमूर्तिं भजेऽहम् ॥

कलियुगवरद-श्रीवेंकटेशप्रसादात्
बुधवरयुत-मूलाण्डाग्रहाराभिजातः ।
व्यरचयदिह वल्लीपर्वतेश-प्रपत्तिम्
प्रतिदिनपठनार्थं रामनाथोऽतिभक्त्या ॥

—o—

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मङ्गलाशासनम्

वल्लीवदन-राजीव-मधुपाय-महात्मने ।
वल्लीगिरिवरेशाय सुब्रह्मण्याय मङ्गलम् ॥ १ ॥

कन्दर्पकोटिलावण्य-निधये कामदायिने ।
कुलिशायुधहस्ताय कुमारायास्तु मङ्गलम् ॥ २ ॥

शूरपद्मादिदैतेय-तमिस्रकुलभानवे ।
तारकासुरकालाय बालकायास्तु मङ्गलम् ॥ ३ ॥

कनकांबरसंशोभि-कटये कलिहारिणे ।
कमलासन वन्द्याय कार्तिकेयाय मङ्गलम् ॥ ४ ॥

मुक्ताहारलसत्कण्ठराजये मुक्तिदायिने ।
देवसेनासमेताय दैवतायास्तु मङ्गलम् ॥ ५ ॥

भक्ताभीष्टप्रदायास्तु भवरोगविनाशिने ।
वल्लीगिरिगुहायास्तु गुहरूपाय मङ्गलम् ॥ ६ ॥

मङ्गलाशासनं संपूर्णम्

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सुब्रह्मण्य गद्यम्

ओं नमो भगवते, सुब्रह्मण्याय, स्वामिने, वल्लीगिरिवर-गह्वरेशाय, गुरुगुहबालकुमारस्वरूपाय, सकलचराचरनिदानाय-ओंकारस्वरूपाय, प्रणवार्थविचारप्रचाराय, शूरपद्माद्दिदैतेय-तारकासुरविध्वंसकाय, निखिलदेवसेनासमूहसंरक्षकाय, देवराज-दुहितृदेवसेनासमेताय, हिमवद्गिरिजामुखपंकजविकासदिवा-कराय, कलिमलहरणाय, कलियुगवरदाय, सकललोकपालकाय, ते नमः ॥ १ ॥

पुरहरनन्दन, रिपुकुलभंजन, शिखीन्द्रवाहन, महेन्द्र-पालन, विनतशोकवारण, विविधलोककारण, सुरवैरिकाल, पुरवैरिबाल, करुणामृतरससागर, तरुणामृतकरशेखर, पितृमनो-हारिमन्दहास, रिपुशिरोदारिचन्द्रहास, कमलासनविनत, चतुरागमविनुत, दलितदनुजवेतण्ड, विबुधवरकोदण्ड, मणिभूषणभासुर, परिपालितभूसुर, लीलाविशेषतोषितशंकर, हेला-विशेषकलितसंगर, सुमसमरदन, शशधरवदन, परिपालय मां परिपालय मां हरनन्दन बालकुमारगुहोम् ॥ २ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जयजय शंकरनन्दन भुजबलनिर्जितानेक दैतेयशूरादि- पद्माख्य दुष्टस्वरूपात्त - भीकारिसंग्रामकृत्तारकावाप्त-गीर्वाणभी- ध्वान्त मार्ताण्डषड्वक्त्र गौरीशफालाक्षसंजाततेजः - समुद्भूत- देवापगातीरशरषण्डे समुद्भूत षड्रूप - दिव्याकृते सूर्यकोटिद्युते भूसुराणांगते ॥ ३ ॥

शरवणभव कृत्तिकास्तन्यपानाप्त-पद्माद्रिजाता करांभोज संलालनातुष्ट-काली-समुत्पन्न - वीराग्र्यसंसेवितानेक - बालोचित- क्रीडिताकीर्णवाराशिभूभृद्वनीसंमते देवसेनारते देवतानां पते ॥ ४ ॥

दिव्यतेजः स्वरूपामरस्तोम संपूज्य कारागृहावाप्त- कंजात जातस्तुताश्चर्य माहात्म्य शक्त्यग्र संभिन्नशैलेन्द्र दैतेयसंहार संतोषितामर्त्य संक्लृप्त दिव्याभिषेकोन्नते तोषित- श्रीपते ॥ ५ ॥

सुमशरसम देवराजात्मभूदेवसेनाकरग्राह संप्राप्त संमोद- वल्लीमनोहारिलीलाविशेषेन्द्रवाहाधिरूढ अतिदीनं कृपादृष्टि- पातेन मां रक्ष तुभ्यं नमो देव तुभ्यं नमः ॥ ६ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मल्लीमरुवक जाजीचंपक बिल्वपुन्नाग केतकी संपङ्गी रोजासरोजादि सुवासना पुष्प लतागुम्भ, रम्भोर्वारुक नारिकेल कदलीद्राक्षा खर्जूर रसाल ताल तमालपूगाम्र पनस कपित्थ जम्बूनारंग दाडिमीबीजापूर रसपूराद्यनेक फलद्रुम सुशोभित वल्लीपर्वताग्रनिवास ॥ ७ ॥

लड्डुक मोदक शष्कुली केसरी गुडापूप माषापूप लेह्य चोष्य क्षीरान्न शर्करान्न मुद्गान्न दध्यन्न तिन्त्रिणीफलान्न निंबफलान्न नारिकेलान्न क्षीरपायस कदलीपायस श्यामाकपायस प्रियंगुपायसादि मधुमधुर नानविध भक्ष्यभोज्य धूपदीपनैवेद्य पानीय एलालवंग घनसार सुमिश्रित परिमलद्रव्योपेत चन्दन ताम्बूल च्छत्रचामरादि षोडशोपचार देवोपचार राजोपचार भक्त्युपचार शक्त्युपचारैस्सुसेवित वल्लीगिरिवर-राजशेखर ॥ ८ ॥

मद्दल डिण्डिम डमरुक झर्झर दुन्दुभी काहली मृदंग ढक्काभेरी पटहादि मंगलवाद्यनिनाद नादस्वर मुरली वायुविलीन वेणु वीणा रुद्रवीणा तुंबुरुवीणा मुखवीणा नारदवीणा दत्तात्रे-यवीणा विचित्रवीणाद्यनेक वाद्यविशेषैर्मधुरगीतविनोद नादबिन्दु कलामणे सकल लोकैक रक्षामणे ॥ ९ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

षण्मुखप्रिया, कौस्तुभप्रिया, पद्मभवानी, चूर्णिकाविनोदिनी, सेनाजयन्ती, देवमनोहरी मनोहरी, जयमनोहरी ललितमनोहरी, कल्याणी, पूर्वकल्याणी, उषाकल्याणी, यमुनाकल्याणी, हमीर् कल्याणी, नीलांबरी, श्यामनीलांबरी, सुखनीलांबरी, हंसनीलांबरी, कोकिलध्वनी, मधुरध्वनी, हंसध्वनी मरुडध्वनी, नागध्वनी, कमास्, शङ्कराभरणम्, वकुलाभरणं, अठाणा, दर्बार्, श्यामा, त्रिमूर्ती, भवप्रिया, निगमसंचारी, कनकश्रीकण्ठी, विजयसरस्वती, मलयमारुतं, वराली, कुन्तलवराली, पुन्नागवराली, पन्तुवराली, शुद्धवराली, कांभोजी, हरिकांभोजी, भैरवी, नटभैरवी, आनन्दभैरवी, कुरञ्जी, नाटकुरञ्जी, भूपालतरंगिणी, जगन्मोहिनी, चित्तरञ्जनी, श्रीरंजनी, आभेरी, रीतिगौला, तोडी, ललिततोडी, हनुमत्तोडी मङ्गलगौरी, मुखारी, शुद्धमुखारी, देशमुखारी, कापी, कानडा, श्रीरागं गणितविनोदिनीत्यादि रागविशेषैर्गानविनोदित हृदयंगमसारंग, ऋग्यजुस्सामाथर्वण निगमविशेषैः संस्तूयमान विभव, रथगजतुरगपदाति सेनासमूहैः सं सेव्यमानप्रताप, वज्र, शक्ति, कृपाण, चाप, बाण, गदाद्यायुध संपन्न, छत्रनटन, डमरुक नटनादिनृत्य कला प्रवीण, मयूर, कुक्कुटलाञ्छन, शूरपद्मसिंहमुख तारकादिदैतेय विमर्दन निखिलप्रपंच संरक्षणैकधुरीण, वल्लीदेवसेनासमेत, वल्लीगिरिगुहनिवास, ओङ्कारस्वरूप, शरवणभवगुह, पाहि मां कलियुगवरद पाहि मां वल्लीगिरिगुह पाहि माम् ॥ १० ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीगुरुभ्यो नमः

॥ श्रीः ॥

श्री शंकरशारदाभ्यां नमः

आनन्दनामसंवत्सरीय भाद्रपदशुक्लपूर्णिमा १-१०-१९७४

शृङ्गगिरि श्रीमहागणपति वाक्यार्थमहासभायाम्

श्रीचरणानां पादारविन्दमूले

मुल्लण्डूम् श्री एम्. वि. रामनाथघनपाठिना-

समर्पिता इयं नवरत्नमालिका

गणपति - सदसि स्तौम्यत्र पीठाधिपांस्तान्
विदितनिगमविद्वद्बृन्द संसेविताङ्घ्रीन् ।
मृदुमधुरसुवाचा भक्तसन्मार्गबोद्धॄन्
जगदभिनवविद्यातीर्थपादान्प्रपद्ये ॥ १ ॥

प्रणवपदरहस्योपासकान् संयमीन्द्रान्
प्रणतिपरजनानुग्रहासक्तमूर्तीन् ।
सितसरसिजवाणीवाग्विलासप्रसन्नान्
जगदभिनवविद्यातीर्थपादान्प्रपद्ये ॥ २ ॥

प्रथमगुरुवर - श्रीशंकराचार्यमूर्तीन्
सकलसुगुणपूर्णान् शारदापीठनिष्ठान् ।
निखिलनिगमसंवित्षण्मतस्थापनाढ्यान्
अहमभिनवविद्यातीर्थपादान्प्रपद्ये ॥ ३ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सुगुणसुजनशिष्टैः स्तूयमानान्यतीन्द्रान्
अखिलनिगमशास्त्रेष्वद्वितीयप्रभावान् ।
विमतमतिविभेत्तॄन् शंकराचार्यवर्यान्
जगदभिनवविद्यातीर्थपादान्प्रपद्ये ॥ ४ ॥

विबुधमहितपीठे शृङ्गगिर्याख्यपुर्याम्
विलसदभिनवाख्यान् संयमीन्द्रान् वरिष्ठान् ।
श्रुतिशिरसि विदीप्तं तत्त्वमाख्यानदीपान्
जगदभिनवविद्यातीर्थपादान्प्रपद्ये ॥ ५ ॥

उपनतजनरक्षादीक्षितांश्चन्द्रचूड-
प्रथितगुरुवरश्री भारतीन्द्रान्तरंगान् ।
विदितनिखिलशास्त्रान् संयमीसार्वभौमान्
जगदभिनवविद्यातीर्थपादान्प्रपद्ये ॥ ६ ॥

शमदमगुणसिध्यातुंगभद्रातटेऽस्मिन्
मुनिगणविबुधेडये शृङ्गगिर्यां सुपीठे ।
प्रतिदिनशिवपूजाशारदोपास्तिसक्तान्
अहमभिनवविद्यातीर्थपादान्प्रपद्ये ॥ ७ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मृदुमधुरकवीनामाश्रयीभूतपीठान्
बुधगणपरितोषे भूतले दानशौण्डान् ।
अधिजलधिसुधीनां षट्पदामंघ्रिपद्मान्
जगदभिनवविद्यातीर्थपादान्प्रपद्ये ॥ ८ ॥

कलियुगवरद श्रीवेंकटेशप्रसादात् ।
बुधवरयुतमूलाण्डाग्रहाराभिजातः ।
जगदभिनवविद्यातीर्थपादप्रभाव-
स्तवमरचयदेवं रामनाथोऽतिभक्त्या ॥ ९ ॥

वेंकटेशकृपया विलिख्यते तीर्थपादनवरत्नपालिका ।
रामनाथघनपाठिना मया भक्तिपूर्वमियमर्प्यतेऽधुना ॥

इति सलक्षण श्री कृष्णयजुर्वेदभाष्याभिज्ञेन
ज्योतिषाभिज्ञेन " वेदभास्कर " बिरूदांकितेन
आन्ध्रप्रदेशप्रभुत्व (AWARD) गौरवसंमानितेन
श्री वेंकटेश्वर प्राच्यकलाशाला (Retired) वेदप्रधानाध्यापकेन
श्रीवेंकटेश्वरवरप्रसादकविना
ब्रह्मश्री एम्. वि. रामनाथघनपाठिना
भाद्रपदशुक्लपूर्णिमा विरचिता तिरुपति ।
१-१०-७४
शृङ्गगिरिः

शुभम्

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रृंगेरि शारदापीठाधिपति भारतीतीर्थ स्वामिपादाः

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ श्री गुरुभ्यो नमः ॥

॥ श्रीशङ्करशारदाभ्यां नमः ॥

रुधिरोद्गारिनामसंवत्सर भाद्रपदशुक्लपूर्णिमायां
शृङ्गगिरि श्रीमहागणपतिवाक्यार्थ महासभायां
श्री चरणानां पादारविन्दमूले मुल्लण्ड्म्
श्री· एम्. वि. रामनाथघनपाठिना समर्पितेयं

नवरत्नमालिका

सहचरठितान्तेवासिमध्ये सुमेधा-
सहितसकलविद्यावाग्विलास प्रसन्नान् ।
जगदभिनवविद्यातीर्थ पादप्रसादात्
नियमितपरिपाट्या पीठसंस्थान् प्रपद्ये ॥ १ ॥

श्री शङ्कराचार्य जगद्गुरूणां
श्री शृङ्गगिर्यां विलसत्सुपीठे ।
श्री बालयोगीन्द्र इति प्रशंस्यान्
श्री भारतीतीर्थ गुरून् प्रपद्ये ॥ २ ॥

श्री तुङ्गभद्रातट संस्थितेऽस्मिन्
श्री शारदापीठमलंकृतांस्तान् ।
श्री शारदोपासनसक्तचित्तान्
श्री भारती तीर्थगुरून् प्रपद्ये ॥ ३ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्री शारदानुग्रहवाग्विलासान्
श्री चन्द्रमौळीश्वरपूजनाढ्यान् ।
वेदान्तविद्यापरिपोषणज्ञान्
श्री भारती तीर्थ गुरून् प्रपद्ये ॥ ४ ॥

बाल्यात्प्रभृत्येव समस्तविद्या-
व्यासङ्गमार्गेण गुणैः प्रपूर्णान् ।
वेदार्थतत्वस्य सुखोपदेष्टॄन्
श्री भारती तीर्थ गुरून् प्रपद्ये ॥ ५ ॥

प्रोत्साहवाक्येन समस्तशिष्यान्
आवर्जयन्तः स्ववशेमुदाते ।
भक्तेषु सर्वेष्वभिमान युक्तान्
श्री भारती तीर्थ गुरून् प्रपद्ये ॥ ६ ॥

समस्तशास्त्रेषु कुशाग्रबुद्धीन्
सभासु वाक्यार्थ विशिष्टधीमान् ।
सर्वासुभाषास्वतिधीर वक्तॄन्
श्रीभारती तीर्थ गुरून् प्रपद्ये ॥ ७ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वेदादिशास्त्रान् परिरक्षणाढ्यान्
सर्वेषु शिष्येषु समत्वदृष्टीन् ।
वेदाङ्ग पाठेषु विशेषसक्तान्
श्रीभारती तीर्थगुरून् प्रपद्ये ॥ ८ ॥

श्रीवेङ्कटेशकरुणाकटाक्षात्
श्रीभारती तीर्थगुरोः प्रपत्ति ।
श्रीरामनाथवचसोद्धृतां तां
सर्वे पठन्तु सकलार्थसिद्ध्यै ॥ ९ ॥

इति श्रीसलक्षणकृष्णयजुर्वेदभाष्याभिज्ञ, ज्योतिषाभिज्ञ 'वेदभास्कर' बिरुदाङ्कितः, वेदवेणुविशारद, आन्ध्रप्रदेशप्रभुत्व [AWARD] गौरवसंमानितः, श्रीवेङ्कटेश्वरप्राच्यकलाशाला-(Retired) वेदप्रधानाध्यापकः श्रीवेङ्कटेश्वरवरप्रसादकविः

एम्. वि. रामनाथघनपाठी ; तिरुपति (आं. प्र)

—०—

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीमहालक्ष्म्यै नमः

श्रीमहालक्ष्मीदण्डकम्

जयजननिमुनीन्द्रदुर्वाससश्शापवैश्वानरेणाभितप्तस्य शक्रस्य संरक्षणायैत्र गीर्वाण दैतेयनिर्मन्थिताम्भोनिधेरुत्थिते, पद्मपीठस्थिते

वस्तिविन्यस्तगाङ्गेय मातङ्गहंसावली संस्तुतामर्त्य भूशिल्प-कौशाल्य सारात्मकक्षौमकूर्पासकावेष्टिते, पादसेवाविनिक्षिप्त हृत्पद्मराराजितामर्त्यकान्तामणीवेष्टिते, विष्णुहृन्मन्दिरे, इन्दिरे

सुरुचिरमुखचन्द्रमश्चन्द्रिकाप्रोल्लसन्नेत्रनीलोत्पले, कोमले, देविकाश्मीरजालेपगौरायमाणत्वदीयांघ्रि शोभाविशेष प्रति-द्योतिताधोक्षजश्यामपालाशितानेक गारुत्मतग्राववैशेषिता वक्रयै-कावळी भारनम्रे त्रिलोकावनम्रे

लसत्कर्णिका मेखलापत्रपाश्याशिरोरत्नकेयूर पादाङ्गुळा वापगालंकृताशेषदेहाभिरामे, रमे

करतलधृतचामराभ्यां ननान्दृस्नुषाभ्यां शिवाशारदाभ्यां-मुदापार्श्वयोर्वीजिते लोकसंपूजिते

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

SRI PADMAVATHI AMMAVARU

Copy rights with
T. T. Devasthanams

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नीलजीमूतसंकाशकेशावळीमध्यविद्योतमातामलाम्भोज जाती-लतामल्लिका पुष्पसौरभ्य संयुक्त मन्दानिलाहूत भृङ्गाङ्गनागान संतुष्टकर्णद्वये, अद्वये, मत्तमातङ्गहस्तार्पिताम्भोजमालाद्वये, पाणिपद्मद्वयोपात्त रक्तांबुातद्वये

सुररिपुशतकण्ठसंहारवेळासमुद्भूतकोपाग्निनिर्दग्ध दैत्याटवी वीक्षणानन्दित स्वान्तबृन्दारकस्तोम संवर्पिताशोक चाम्पेय पुन्नागमन्दार कुन्दारविन्दाभ्र पुष्पौघसंशान्त कोपानले, भक्त-दारिद्र्य कान्तारदावानले, सर्वलोकात्मिके, सर्वभूतात्मिके, सर्ववेदात्मिके, सर्वविद्यात्मिके, सर्वसम्पत्प्रदे, पाहि मां पाहि मां, पाहि श्रीः ॥

॥ ओं तत्सत् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ श्री सरस्वती देवतायै नमः ॥

॥ श्रीसरस्वतीदण्डकम् ॥

जय जय जयवाणि कल्यणि पाणि प्रवालात्तमाणिक्य-वीणा गुणास्फालनाविर्भवत्स्वादु नादामृतास्वादनोद्यत्प्रमोदाश्रु मिश्राम्बके, सर्वलोकाम्बिके,

श्री महाशारदे शारदेन्दु स्फुरत्स्मेरवक्त्रोच्चलापाङ्ग-रुक्चन्द्रिकासार कासारमज्जन्नमज्जातचेतश्चकोरे, वचोधूतकीरे, चतुर्वक्त्र वक्त्राब्जकान्तारखेलन्मरालिस्खलन्मौळि सन्दानिता मन्द मन्दार कुन्दारविन्दादि मालामरन्दप्रवाहाभिषिक्तांघ्रि-पाथोरुहे, भक्तचेतोगृहे ;

हारनीहारकर्पूरमन्दारमन्दाकिनीपूरताराचलक्षीरनीराकरो-दारशोभातिरस्कारिगौरप्रभाहारि हीराङ्ककोटीरताटङ्ककेयूर हारा-वळीपारिहार्यादि भूषाविशेषोज्ज्वलागण्य लावण्य तारुण्य पुण्य-स्फुरद्विग्रहे ; देवि सानुग्रहे ;

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.



श्री शारदाम्बा, शृंगेरि

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जय भगवति भारतिख्यातरम्भारति श्रीकराम्भोजनृत्यन्मराळीलसच्चामराळीसमीराङ्कुरालोलनीलालकालम्बिरोलम्बमाला मुहुश्चुम्बितास्याम्बुजोद्गीर्णमारन्दबिन्दुस्फुरन्मन्दहासप्रभाभासमाना समानाधरोष्ठप्रवाळावतंसीकृतश्वेतरुक्केतकीदीप्रवाले, निशाकान्तकान्तोपलादर्श संदर्शनीय स्फुरच्छ्रीकपोले, कला केळिशाले, सदानन्दशीले, शशाङ्कार्द्रफाले, शतानन्दलोले,

वराभीतिकृत्पुस्तकोद्धासिहस्ते, त्रिलोकप्रशस्ते नमस्ते, नताभीप्सितस्वर्लते, सर्वसम्भाविते, देवि ते नमः ॥

॥ शुभम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ श्रीत्यागराजसुप्रभातम् ॥

श्रीमत्-पञ्चनदक्षेत्रे स्थिरवासिन् महागुरो
नादब्रह्मस्वरूपेण परे ब्रह्मणि लीयसे ।
तद्रहस्यप्रबोद्धा त्वमुत्तिष्ठ गुरुशेखर
सङ्गीतगानरसिकान् त्वमुद्धर्तुमिहार्हसि ॥

नित्यं त्वयाकृतमतीव सुशोभनं यत्
श्रीरामनामभजनं सकलार्थदं हि ।
संकीर्तनेन सकलानपि तोषय त्वं
श्रीत्यागराजसुगुरो तव सुप्रभातम् ॥

त्वद्रागताललयपूरितकीर्तनानि
भक्तिप्रपत्तिमिलितानि सुगायकानाम् ।
इष्टार्थसिद्धिवरदानि मनोहराणि
श्रीत्यागराजसुगुरो तव सुप्रभातम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीत्यागराज स्वामि
तिरुवैय्यारु

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीभारतीजनमनोरथगानलक्ष्य-
सत्संप्रदायपरिरक्षणलक्षणज्ञ ।
सत्कीर्तनं सुलभमार्गकृतिप्रणेतः
श्रीत्यागराज सुगुरो तव सुप्रभातम् ॥

त्वत्कीर्तने शिवमनोः प्रथमं मकारम्
नारायणस्य मनुरेफमथेरितं हि ।
तस्मान् मरामनुरिति प्रथितस्त्वयापि
श्रीत्यागराजसुगुरो तव सुप्रभातम् ॥

वाल्मीकिना कृतमिति प्रथितं चरित्रम्
रामायणं कलियुगे भवता कृतं हि ।
श्रीरामभक्तियुतकीर्तनगानदक्ष
श्रीत्यागराज सुगुरो तव सुप्रभातम् ॥

वाल्मीकिरेव लयगानविलोलुपोऽद्य
श्रीत्यागराजगुरुरित्यवतारवांस्त्वम् ।
तस्मात् भवानपर आदिकविर्विभासि
श्रीत्यागराज सुगुरो तव सुप्रभातम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ताळं करे भजनसाधनतम्बुरादीन्
धृत्वा प्रभातसमये स्मृतिबोधकस्त्वम् ।
त्वत्कीर्तनामृतरसात् सकला प्रबुद्धाः
श्रीत्यागराज सुगुरो तव सुप्रभातम् ॥

रामं सदा हरिहरात्मकमैक्यबुध्या
स्तोत्रं करोषि तव कीर्तनलक्ष्यसिध्यै ।
अद्वैतभावमुपदिश्य गुरुर्विभासि
श्रीत्यागराज सुगुरो तव सुप्रभातम् ॥

श्रीमत्बुधेन्द्रगिरिराजसुतस्य राम-
ब्रह्माख्यपुण्यचरितस्य सुपुत्रराज ।
श्रीरामनामगुणवैभवगानलोल
श्रीत्यागराज सुगुरो तव सुप्रभातम् ॥

संगीतगानरसिकाग्रशिखामणिः सन्
तन्नादकीर्तनमुखात् सकलार्थभाक्त्वम् ।
त्वामेव नित्यमनुशंसति गानलोकः
श्रीत्यागराजसुगुरो तव सुप्रभातम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीरामचन्द्रमनुसृत्य जले निविष्टं
संप्रार्थयन् मम गृहं प्रविशेति भक्त्या ।
त्वद्भक्तिभावमनुसृत्य गृहागतोसि
श्रीत्यागराज सुगुरो तव सुप्रभातम् ॥

संगीतशास्त्रपरिरक्षणलक्ष्यदृष्ट्या
भक्तिप्रपत्तिकलनात् तव कार्यसिद्ध्यै ।
संगीतगानकृतिकीर्तनकाव्यकर्ता
श्रीत्यागराज सुगुरो तव सुप्रभातम् ॥

त्वत्कीर्तनामृतमहो परमार्थतत्त्वं
आस्वादयंश्च मनुजान् सकलार्थसिद्ध्यै ।
तस्मात् यशस्तनुभृतां गणनेऽग्रगण्य
श्रीत्यागराज सुगुरो तव सुप्रभातम् ॥

श्रीरामचन्द्रभजनामृतगानवृत्ते
श्रीजानकीमृदुपदाम्बुजचित्तवृत्ते ।
श्रीमद्धनूमदनुपालितभक्तिचित्त-
श्रीत्यागराज सुगुरो तव सुप्रभातम् ॥

श्रीवेङ्कटेश्वरकवित्ववरप्रसादं
श्रीरामनाथवरभक्तकविप्रणीतम् ।
श्रीत्यागराजसुगुरोरिह सुप्रभातम्
नित्यं पठन्तु मनुजास्सकलार्थसिद्ध्यै ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ स्तोत्रम् ॥

कमलालयजन्मपुनीततनो
कलिकल्मषनाशनभक्तियुत ।
कविकर्मणि कीर्तनगानकर
भुवि सर्वजनस्य हितप्रबल ॥

लयताळदुरूहरहस्यविद
भजनामृतसारविलीनमते ।
भवतापविमोचक गानगुरो
रघुरामपदाश्रितकाव्यकर ॥

सकलागमसारकृतिप्रचुर
स्वररागनवीनवितानधुर ।
सरलं तव काव्यममोघफलं
दिशतीति समस्तबुधैर्निदितम् ॥

अवतारविशेष इति प्रथितं
कविताजनमानसतत्त्वविभुम् ।
अनघं विमलं सुजनं सुगुणं
सततं सुगुरुं तमहं शरणम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जनकादिमहामतिनिश्चलधीः
परतत्त्वविचारवतां च सुधीः ।
स्वरंरागमहार्णवलब्धधनी
करताळश्रुतंबुरुवाद्यधुनी ॥

विदितः स्वरसप्तसुनादगुरो
कविमानसहंस सुराजगुरो ।
तव रामसनाथ कविप्रिय हे
मुदितः स्तुतिमादृतवान् भव मे ॥

—०—

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ प्रपत्तिः ॥

वेदान्तसारविशदीकृतगानलोलं
ओंकारनादसरसीरुहभृङ्गराजम् ।
भक्ताग्रगण्यमतुलं महनीयमूर्तिं
श्रीत्यागराज सुगुणं शरणं प्रपद्ये ॥

आसेतुशीतनगसंस्तुतवैभवाढ्यं
आंध्रप्रदेशविबुधाखिलकल्पवृक्षम् ।
आद्राविडं हि सुमहत्तिलकायमानं
श्रीत्यागराजसुगुणं शरणं प्रपद्ये ॥

भक्ताननु प्रतिदिनं स्वयमेव गत्वा
संसारतारकमहामनुमेव जप्त्वा ।
कारुण्यबुद्धिभरितं च महानुभावं
श्रीत्यागराजसुगुणं शरणं प्रपद्ये ॥

संसारसागरसमुत्तरणैकनावं
भक्तिप्रपत्तिसुपदेशवतां प्रसिद्धम् ।
नादेन सर्व उपयांत्विति बोधयन्तम्
श्रीत्यागराजसुगुणं शरणं प्रपद्ये ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

लोकोपकारकमहामतिपुण्यशीलं
शान्तं च सत्यममलं ह्युपकारशीलम् ।
भूमण्डलेऽखिलयशस्तनुना प्रसन्नं
श्रीत्यागराजसुगुणं शरणं प्रपद्ये ॥

राजाङ्गदानकनकादितिरस्कृतं तम्
राजाधिराजमनुमेव पुरस्कृतं हि ।
तन्मंत्रषण्णवतिकोटिजपप्रभावं
श्रीत्यागराज सुगुणं शरणं प्रपद्ये ॥

प्रह्लादनारदपुरंदररामदास-
भक्ताग्रगण्यसुजनान् परिकीर्तयन्तम् ।
बुद्धं च शुद्धमनघं ह्यरिषड्विमुक्तम्
श्रीत्यागराजसुगुणं शरणं प्रपद्ये ॥

श्रीवेङ्कटाचलपतिप्रियदर्शनार्थं
रुद्धोऽपि तत्समय एव तिरस्करिण्या ।
त्वद्भक्तिकीर्तनमुखात् स्वयमाविरासीत्
श्रीत्यागराजसुगुणं शरणं प्रपद्ये ॥

श्रीवेङ्कटेशकरुणालहरीप्रभावं
श्रीरामनाथकविमानसभक्तिभावं
श्रीत्यागराजसुगुणार्णवसुप्रपत्तिं
भक्त्या पठन्त्वनुदिनं स्वमनोरथाप्त्यै ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ मङ्गळम् ॥

काकर्लवंशसंभूतरामब्रह्मसुताय ते ।
शान्ताम्बागर्भसंभूतत्यागराजाय मङ्गलम् ॥

कावेरीतीरवासाय कलिकल्मषनाशिने ।
गानशास्त्रप्रवीणाय त्यागराजाय मङ्गळम् ॥

श्रीमत्पञ्चनदक्षेत्रे नित्यवासाय योगिने ।
साकेताधिपभक्ताय त्यागराजाय मङ्गळम् ॥

संगीतशास्त्रमालोड्य कृतिकीर्तनकारिणे ।
कलौ वाल्मीकिरूपाय त्यागराजाय मङ्गळम् ॥

त्वन्नाममुद्रणेनैव क्रियते कीर्तनानि हि ।
निष्कामकर्मशीलाय त्यागराजाय मङ्गळम् ॥

शिवविष्ण्वैक्यबोधाय नादब्रह्मस्वरूपिणे ।
स्वान्तस्सुखाय शान्ताय त्यागराजाय मङ्गळम् ॥

अपूर्वरागसंधात्रे तल्लक्षणनिरूपणे ।
सप्तस्वरस्वरूपाय त्यागराजाय मङ्गळम् ॥

चतुर्विंशतिसाहस्रकृतिकर्त्रे महात्मने ।
नारदाचार्यशिष्याय त्यागराजाय मङ्गळम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अष्टपञ्चाक्षरीसारनामोद्धारकमूर्तये ।
अष्टदिक्-ख्यातिविख्याতत्यागराजाय मङ्गळम् ॥

संगीतविद्वत्वृंदस्य भुक्तिमुक्तिप्रदायिने ।
नादोपासनरक्ताय त्यागराजाय मङ्गळम् ॥

रामनामप्रचाराय गानलोकहिताय ते ।
गाननादविलोलाय त्यागराजाय मङ्गळम् ॥

रामनामजपोत्साह-सषण्णवतिकोटिभिः ।
जपसंसिद्धिसंप्राप्तत्यागराजाय मङ्गळम् ॥

सुलभोपायमार्गेण मोक्षसाम्राज्यदायिने ।
भक्तिप्रपत्तिसिद्धाय त्यागराजाय मङ्गळम् ॥

रामनाथकवेर्वाचा सुप्रभातानुमोदक ।
स्तोत्रेणानेन तृप्ताय त्यागराजाय मङ्गळम् ॥

Sri Sankaracharya Sanskrit
520

—o—

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.